(५१७)

अग्निं नरो दीधितिभिर् अरण्योर् हस्तच्युती जनयन्त प्रशस्तम् ।
दूरेदृशं गृहपतिम् अथर्युम् ॥ ७ ००१ ०१
तम् अग्निम् अस्ते वसवो न्य् ऋण्वन् सुप्रतिचक्षम् अवसे कुतश् चित् ।
दक्षाय्यो यो दम आस नित्यः ॥ ७ ००१ ०२
प्रेद्धो अग्ने दीदिहि पुरो नो ऽजस्रया सूर्म्या यविष्ठ ।
त्वां शश्वन्त उप यन्ति वाजाः ॥ ७ ००१ ०३
प्र ते अग्नयो ऽग्निभ्यो वरं निः सुवीरासः शोशुचन्त द्युमन्तः ।
यत्रा नरः समासते सुजाताः ॥ ७ ००१ ०४
दा नो अग्ने धिया रयिं सुवीरं स्वपत्यं सहस्य प्रशस्तम् ।
न यं यावा तरति यातुमावान् ॥ ७ ००१ ०५
उप यम् एति युवतिः सुदक्षं दोषा वस्तोर् हविष्मती घृताची ।
उप स्वैनम् अरमतिर् वसुयुः ॥ ७ ००१ ०६
विश्वा अग्ने ऽप दहारातीर् येभिस् तपोभिर् अदहो जरूथम् ।
प्र निस्वरं चातयस्वामीवाम् ॥ ७ ००१ ०७
आ यस् ते अग्न इधते अनीकं वसिष्ठ शुक्र दीदिवः पावक ।
उतो न एभि स्तवथैर् इह स्याः ॥ ७ ००१ ०८
वि ये ते अग्ने भेजिरे अनीकम् मर्ता नरः पित्र्यासः पुरुत्रा ।
उतो न एभिः सुमना इह स्याः ॥ ७ ००१ ०९
इमे नरो वृत्रहत्येषु शूरा विश्वा अदेवीर् अभि सन्तु मायाः ।
ये मे धियम् पनयन्त प्रशस्ताम् ॥ ७ ००१ १०
मा शूने अग्ने नि षदाम नृणाम् माशेषसो ऽवीरता परि त्वा ।
प्रजावतीषु दुर्यासु दुर्य ॥ ७ ००१ ११
यम् अश्वी नित्यम् उपयाति यज्ञम् प्रजावन्तं स्वपत्यं क्षयं नः ।
स्वजन्मना शेषसा वावृधानम् ॥ ७ ००१ १२
पाहि नो अग्ने रक्षसो अजुष्टात् पाहि धूर्तेर् अररुषो अघायोः ।
त्वा युजा पृतनायूर् अभि ष्याम् ॥ ७ ००१ १३

सेद् अग्निर् अग्नीर् अत्य् अस्त्व् अन्यान् यत्र वाजी तनयो वीळुपाणिः ।
सहस्रपाथा अक्षरा समेति ॥ ७ ००१ १४
सेद् अग्निर् यो वनुष्यतो निपाति समेद्धारम् अंहस उरुष्यात् ।
सुजातासः परि चरन्ति वीराः ॥ ७ ००१ १५
अयं सो अग्निर् आहुतः पुरुत्रा यम् ईशानः सम् इद् इन्धे हविष्मान् ।
परि यम् एत्य् अध्वरेषु होता ॥ ७ ००१ १६
त्वे अग्न आहवनानि भूरीशानास आ जुहुयाम नित्या ।
उभा कृण्वन्तौ वहतू मियेधे ॥ ७ ००१ १७
इमो अग्ने वीततमानि हव्याजस्रो वक्षि देवतातिम् अच्छ ।
प्रति न ई सुरभीणि व्यन्तु ॥ ७ ००१ १८
मा नो अग्ने ऽवीरते परा दा दुर्वाससे ऽमतये मा नो अस्यै ।
मा नः क्षुधे मा रक्षस ऋतावो मा नो दमे मा वन आ जुहूर्थाः ॥ ७ ००१ १९
नू मे ब्रह्माण्य् अग्न उच् छशाधि त्वं देव मघवञ्छ्रयः सुषूदः ।
रातौ स्यामोभयास आ ते यूयम् पात स्वस्तिभिः सदा नः ॥ ७ ००१ २०
त्वम् अग्ने सुहवो रण्वसंदृक् सुदीती सूनो सहसो दिदीहि ।
मा त्वे सचा तनये नित्य आ धङ् मा वीरो अस्मन् नर्यो वि दासीत् ॥ ७ ००१ २१
मा नो अग्ने दुर्भृतये सचैषु देवेद्धेष्व् अग्निषु प्र वोचः ।
मा ते अस्मान् दुर्मतयो भुमाच् चिद् देवस्य सूनो सहसो नशन्त ॥ ७ ००१ २२
स मर्तो अग्ने स्वनीक रेवान् अमर्त्ये य आजुहोति हव्यम् ।
स देवता वसुवनिं दधाति यं सूरिर् अर्थी पृच्छमान एति ॥ ७ ००१ २३
महो नो अग्ने सुवितस्य विद्वान् रयिं सूरिभ्य आ वहा बृहन्तम् ।
येन वयं सहसावन् मदेमाविक्षितास आयुषा सुवीराः ॥ ७ ००१ २४
नू मे ब्रह्माण्य् अग्न उच् छशाधि त्वं देव मघवञ्छ्रयः सुषूदः ।
रातौ स्यामोभयास आ ते यूयम् पात स्वस्तिभिः सदा नः ॥ ७ ००१ २५
(५१८)
जुषस्व नः समिधम् अग्ने अद्य शोचा बृहद् यजतं धूमम् ऋण्वन् ।
उप स्पृश दिव्यं सानु स्तूपैः सं रश्मिभिस् ततनः सूर्यस्य ॥ ७ ००२ ०१
नराशंसस्य महिमानम् एषाम् उप स्तोषाम यजतस्य यज्ञैः ।

ये सुक्रतवः शुचयो धियंधाः स्वदन्ति देवा उभयानि हव्या ॥ ७ ००२ ०२
ईळेन्यो वो असुरं सुदक्षम् अन्तर् दूतं रोदसी सत्यवाचम् ।
मनुष्वद् अग्निम् मनुना समिद्धं सम् अध्वराय सदम् इन् महेम ॥ ७ ००२ ०३
सपर्यवो भरमाणा अभिज्ञु प्र वृञ्जते नमसा बर्हिर् अग्नौ ।
आजुह्वाना घृतपृष्ठम् पृषद्वद् अध्वर्यवो हविषा मर्जयध्वम् ॥ ७ ००२ ०४
स्वाध्यो ३ वि दुरो देवयन्तो ऽशिश्रयू रथयुर् देवताता ।
पूर्वी शिशुं न मातरा रिहाणे सम् अग्रुवो न समनेष्व् अञ्जन् ॥ ७ ००२ ०५
उत योषणे दिव्ये मही न उषासानक्ता सुदुघेव धेनुः ।
बर्हिषदा पुरुहूते मघोनी आ यज्ञिये सुविताय श्रयेताम् ॥ ७ ००२ ०६
विप्रा यज्ञेषु मानुषेषु कारू मन्ये वां जातवेदसा यजध्यै ।
ऊर्ध्वं नो अध्वरं कृतं हवेषु ता देवेषु वनथो वार्याणि ॥ ७ ००२ ०७
आ भारती भारतीभिः सजोषा इळा देवैर् मनुष्येभिर् अग्निः ।
सरस्वती सारस्वतेभिर् अर्वाक् तिस्रो देवीर् बर्हिर् एदं सदन्तु ॥ ७ ००२ ०८
तन् नस् तुरीपम् अध पोषयित्नु देव त्वष्टर् वि रराणः स्यस्व ।
यतो वीरः कर्मण्यः सुदक्षो युक्तग्रावा जायते देवकामः ॥ ७ ००२ ०९
वनस्पते ऽव सृजोप देवान् अग्निर् हविः शमिता सूदयाति ।
सेद् उ होता सत्यतरो यजाति यथा देवानां जनिमानि वेद ॥ ७ ००२ १०
आ याह्य अग्ने समिधानो अर्वाङ् इन्द्रेण देवैः सरथं तुरेभिः ।
बर्हिर् न आस्ताम् अदितिः सुपुत्रा स्वाहा देवा अमृता मादयन्ताम् ॥ ७ ००२ ११

(५११)

अग्निं वो देवम् अग्निभिः सजोषा यजिष्ठं दूतम् अध्वरे कृणुध्वम् ।
यो मर्त्येषु निध्रुविर् ऋतावा तपुर्मूर्धा घृतान्नः पावकः ॥ ७ ००३ ०१
प्रोथद् अश्वो न यवसे ऽविष्यन् यदा महः संवरणाद् व्य् अस्थात् ।
आद् अस्य वातो अनु वाति शोचिर् अध स्म ते व्रजनं कृष्णम् अस्ति ॥ ७ ००३ ०२
उद् यस्य ते नवजातस्य वृष्णो ऽग्ने चरन्त्य् अजरा इधानाः ।
अच्छा द्याम् अरुषो धूम एति सं दूतो अग्न ईयसे हि देवान् ॥ ७ ००३ ०३

वि यस्य॑ ते पृथि॒व्याम् पाजो॒ अश्रे॑त् तृ॒षु यद् अन्ना॑ स॒मवृ॑क्त॒ जम्भैः॑ ।
सेने॑व सृ॒ष्टा प्रसि॑तिष् ट एति॒ यवं॒ न द॑स्म जु॒ह्वा विवेक्षि ॥ ७ ००३ ०४
तम् इद् दो॒षा तम् उ॒षसि॒ यवि॑ष्ठम् अ॒ग्निम् अत्यं॒ न म॑र्जयन्त॒ नरः॑ ।
नि॒शिशा॑ना॒ अति॑थिम् अस्य॒ योनौ॑ दी॒दाय॑ शो॒चिर् आहु॑तस्य॒ वृष्णः॑ ॥ ७ ००३ ०५
सु॒सं॒दृक् ते॑ स्वनीक॒ प्रती॑कं॒ वि यद् रु॒क्मो न रोच॑स उपा॒के ।
दि॒वो न ते॑ तन्य॒तुर् ए॑ति॒ शुष्म॑श् चि॒त्रो न सूरः॒ प्रति॑ चक्षि भा॒नुम् ॥ ७ ००३ ०६
यथा॑ वः॒ स्वाहा॒ग्नये॒ दाशे॑म॒ परीळा॑भिर् घृ॒तव॑द्भिश् च ह॒व्यैः ।
तेभि॑र् नो अग्ने॒ अमि॑तै॒र् महो॑भिः श॒तम् पू॒र्भिर् आय॑सीभि॒र् नि पा॑हि ॥ ७ ००३ ०७
या वा॑ ते॒ सन्ति॑ दा॒शुषे॒ अधृ॑ष्टा॒ गिरो॑ वा॒ याभि॑र् नृ॒वती॑र् उरु॒ष्याः ।
ताभि॑र् नः सूनो सहसो॒ नि पा॑हि॒ स्मत् सू॒रीञ् ज॑रि॒तॄञ् जा॑तवेदः ॥ ७ ००३ ०८
निर् यत् पू॒तेव॒ स्वधि॑तिः॒ शुचि॒र् गात् स्वया॑ कृ॒पा त॒न्वा ३॒॑ रोच॑मानः ।
आ यो मा॒त्रोर् उ॒शेन्यो॒ जनि॑ष्ट देव॒यज्या॑य सु॒क्रतुः॑ पाव॒कः ॥ ७ ००३ ०९
ए॒ता नो॑ अग्ने॒ सौभ॑गा दिदी॒ह्य अपि॒ क्रतुं॑ सु॒चेत॑सं वतेम ।
विश्वा॑ स्तो॒तृभ्यो॑ गृण॒ते च॑ सन्तु यू॒यम् पा॑त स्व॒स्तिभिः॒ सदा॑ नः ॥ ७ ००३ १०

(५२०)

प्र वः॑ शु॒क्राय॑ भा॒नवे॑ भरध्वं ह॒व्यम् म॒तिं चा॒ग्नये॒ सुपू॑तम् ।
यो दैव्या॑नि॒ मानु॑षा ज॒नूंष्य् अ॒न्तर् विश्वा॑नि वि॒द्मना॒ जिगा॑ति ॥ ७ ००४ ०१
स गृत्सो॑ अ॒ग्निस् तरु॑णश् चिद् अस्तु॒ यतो॒ यवि॑ष्ठो॒ अज॑निष्ट मा॒तुः ।
सं यो वना॑ यु॒वते॒ शुचि॑द॒न् भूरि॑ चि॒द् अन्ना॒ सम् इद् अ॑त्ति स॒द्यः ॥ ७ ००४ ०२
अ॒स्य दे॒वस्य॑ सं॒सद्य् अनी॑के॒ यम् मर्ता॑सः श्ये॒तं ज॑गृ॒भ्रे ।
नि यो गृभ॒म् पौरु॑षेयीम् उ॒वोच॑ दु॒रोक॑म् अ॒ग्निर् आ॒यवे॑ शुशोच ॥ ७ ००४ ०३
अ॒यं क॒विर् अक॑विषु॒ प्रचे॑ता॒ मर्ते॑ष्व् अ॒ग्निर् अ॒मृतो॒ नि धा॑यि ।
स मा नो॒ अत्र॑ जुहुरः सहस्वः॒ सदा॒ त्वे सु॒मन॑सः स्याम ॥ ७ ००४ ०४
आ यो योनिं॑ दे॒वकृ॑तं स॒साद॒ क्रत्वा॒ ह्य अ १॒॑ ग्निर् अ॒मृता॒ꣳ अता॑रीत् ।
तम् ओष॑धीश् च व॒निन॑श् च॒ गर्भ॒म् भूमि॑श् च वि॒श्वधा॑यसम् बिभर्ति ॥ ७ ००४ ०५
ईशे॒ ह्य अ १॒॑ ग्निर् अ॒मृत॑स्य॒ भूरे॒र् ईशे॑ रा॒यः सु॒वीर्य॑स्य॒ दातोः॑ ।

मा त्वा॑ वयं सहसावन्न् अवीरा माप्स॑वः परि॑ षदाम मादु॑वः ॥ ७ ००४ ०६
परि॑षद्यं ह्य् अर॑णस्य रेक्णो नित्य॑स्य रा॒यः पत॑यः स्याम ।
न शेषो॑ अग्ने अ॒न्यजा॑तम् अ॒स्त्य् अचे॑तानस्य मा प॒थो वि दु॑क्षः ॥ ७ ००४ ०७
न॒हि ग्रभा॑यार॑णः सु॒शेवो॑ ऽन्योद॑र्यो मन॑सा मन्तवा उ॑ ।
अधा॑ चि॒द् ओकः॑ पुन॒र् इत् स ए॒त्य् आ नो॑ वा॒ज्य् अभी॑षाळ् ए॑तु नव्यः॑ ॥ ७ ००४ ०८
त्वम् अ॑ग्ने वनुष्य॒तो नि पा॑हि॒ त्वम् उ॑ नः सहसावन्न् अव॒द्यात् ।
सं त्वा॑ ध्वस्मन्वद् अ॒भ्य् एतु पाथः॒ सं र॒यि स्पृ॒हया॑य्यः॑ सह॒स्री ॥ ७ ००४ ०९
ए॒ता नो॑ अग्ने सौभ॑गा दिदी॒ह्य् अपि॒ क्रतु॑ सु॒चेत॑सं वतेम ।
विश्वा॑ स्तो॒तृभ्यो॑ गृ॒णते॑ च॑ सन्तु यू॒यम् पा॑त स्व॒स्तिभि॒ः सदा॑ नः ॥ ७ ००४ १०

(५२१)

प्राग्नये॑ त॒वसे॑ भरध्वं गिर॑ दि॒वो अ॑र॒तये॑ पृथि॒व्याः ।
यो विश्वे॑षाम् अ॒मृता॑नाम् उ॒पस्थे॑ वैश्वा॒नरो वा॑वृ॒धे जा॑गृ॒वद्भि॑ः ॥ ७ ००५ ०१
पृ॒ष्टो दि॒वि धाय्य् अ॒ग्निः पृ॑थि॒व्यां ने॒ता सिन्धू॑नां वृ॒षभ स्तिया॑नाम् ।
स मानु॑षीर् अ॒भि विशो॒ वि भा॑ति वैश्वा॒नरो वा॑वृधा॒नो वरे॑ण ॥ ७ ००५ ०२
त्वद् भि॒या विश॑ आय॒न्न् असि॑क्नीर् असम॒ना जह॑तीर् भोज॒नानि ।
वैश्वा॑नर पूर॒वे शोशु॑चानः पु॒रो यद् अ॑ग्ने द॒रय॒न्न् अदी॑दे॒ः ॥ ७ ००५ ०३
तव॑ त्रि॒धातु॑ पृथि॒वी उ॒त द्यौर् वैश्वा॑नर व्र॒तम् अ॑ग्ने सचन्त ।
त्वम् भा॒सा रोद॑सी॒ आ त॑तन्थाज॒स्रेण॑ शो॒चिषा॒ शोशु॑चानः ॥ ७ ००५ ०४
त्वाम् अ॑ग्ने ह॒रितो॑ वावशा॒ना गिर॑ः सचन्ते धुन॑यो घृ॒ताची॑ः ।
पतिं॑ कृ॒ष्टीनां॑ र॒थ्यं॑ रयी॒णां वैश्वा॑नरम् उ॒षसां॑ के॒तुम् अह्नां॑म् ॥ ७ ००५ ०५
त्वे अ॑सुर्य॑ १॑ वसवो॒ न्य् ऋ॑ण्वन् क्रतुं॑ हि ते॑ मित्रमहो जु॒षन्त॑ ।
त्वं दस्यू॒र् ओक॑सो अग्न आज उ॒रु ज्योति॑र् ज॒नय॒न्न् आर्या॑य ॥ ७ ००५ ०६
स जाय॑मानः पर॒मे व्योमन् वा॒युर् न पाथः॒ परि॑ पासि स॒द्यः ।
त्वम् भु॑व॒ना ज॒नय॑न्न् अभि क्रन्न् अप॒त्याय जातवेदो दश॒स्यन् ॥ ७ ००५ ०७
ताम् अ॑ग्ने अ॒स्मे इष॒म् एर॑यस्व वैश्वा॑नर द्यु॒मती॑ जातवेदः ।

यया॒ राध॒: पिन्व॑सि विश्ववार॒ पृथु॒ श्रवो॑ दा॒शुषे॒ मर्त्या॑य ॥ ७ ००५ ०८
तं नो॑ अग्ने मघव॒ञ्छ्रय॑: पुरु॒क्षुं र॒यिं नि वा॑ज॒ं श्नुत्यं॑ युवस्व ।
वैश्वा॑नर॒ महि॑ न॒: शर्म॑ यच्छ रु॒द्रेभि॑र् अग्ने॒ वसु॑भि: स॒जोषा॑: ॥ ७ ००५ ०९

(५२२)

प्र स॒म्राजो॒ असु॑रस्य॒ प्रश॑स्तिम् पु॒ंस: कृ॒ष्टीना॑म् अ॒नुमा॒द्यस्य॑ ।
इन्द्र॑स्येव॒ प्र त॒वस॑स् कृ॒तानि॒ वन्दे॑ दा॒रुं व॒न्दमा॑नो विवक्मि ॥ ७ ००६ ०१
क॒विं के॒तुं धा॑सिम् भा॒नुम् अद्रे॑र् हि॒न्वन्ति॒ शं राज्यं॑ रोद॒स्यो: ।
पु॒रंद॑रस्य॒ गीर्भि॑र् आ॒ वि॑वासे ऽग्ने॒र् व्र॒तानि॑ पू॒र्व्या म॒हानि॑ ॥ ७ ००६ ०२
न्य् अ॑क्रतून् ग्र॒थिनो॑ मृ॒ध्रवा॑च: प॒णीर् अ॑श्र॒द्धाँ अ॑वृ॒धाँ अ॑यज्ञान् ।
प्र-प्र तान् दस्यू॑र् अ॒ग्निर् वि॑वाय॒ पूर्वश् चकारापरा॒ँ अय॑ज्यून् ॥ ७ ००६ ०३
यो अ॑पा॒चीने॒ तम॑सि॒ मद॑न्ती: प्रा॒चीश् च॑कार॒ नृत॑म॒: शची॑भि: ।
तम् ईशा॑नं॒ वस्वो॑ अ॒ग्निं गृ॑णीषे ऽनान॒तं द॒मय॑न्तम् पृत॒न्यून् ॥ ७ ००६ ०४
यो दे॒ह्यो ३॑ अन॑मयद् वधस्नै॒र् यो अ॒र्यप॑त्नीर् उ॒षस॑श् चकार॒ ।
स नि॒रुध्या॒ नहु॑षो य॒ह्वो अ॒ग्निर् विश॑श् चक्रे बलिहृ॒त: सहो॑भि: ॥ ७ ००६ ०५
यस्य॒ शर्म॑न्न् उप॒ विश्वे॒ जना॑स॒ एवै॑स् त॒स्थु: सु॒म॒तिम् भिक्ष॑माणा: ।
वैश्वा॑नरो॒ वर॒म् आ रो॑दस्यो॒र् आग्नि: स॑साद पि॒त्रो॒र् उ॒पस्थ॑म् ॥ ७ ००६ ०६
आ दे॒वो द॑दे॒ बु॒ध्या ३॑ वसू॑नि वैश्वा॒नर॒ उदि॑ता॒ सूर्य॑स्य ।
आ स॑मु॒द्राद् अव॑राद् आ॒ पर॑स्मा॒द् आग्नि॒र् द॑दे॒ दिव॒ आ पृ॑थि॒व्या: ॥ ७ ००६ ०७

(५२३)

प्र वो॑ दे॒वं चि॑त् सहसा॒नम् अ॒ग्निम् अश्वं॑ न वा॒जिन॑ं हिषे॒ नमो॑भि: ।
भवा॑ नो दू॒तो अ॑ध्व॒रस्य॑ वि॒द्वान् त्मना॑ दे॒वेषु॑ विविदे मि॒तद्रु॑: ॥ ७ ००७ ०१
आ याह्य् अग्ने॒ पथ्या ३॑ अनु॒ स्वा म॒न्द्रो दे॒वाना॑ स॒ख्यं जु॑षा॒ण: ।
आ सानु॒ शुष्मै॑र् नदयन् पृथि॒व्या ज॒म्भेभि॑र् विश्वम् उ॒शध॑ग् वना॑नि ॥ ७ ००७ ०२
प्रा॒चीनो॑ य॒ज्ञ: सु॒धि॑तं हि ब॒र्हि: प्रीणी॑ते अ॒ग्निर् ई॑ळि॒तो न होता॑ ।

आ मातरा विश्ववारे हुवानो यतो यविष्ठ जज्ञिषे सुशेवः ॥ ७ ००७ ०३
सद्यो अध्वरे रथिरं जनन्त मानुषासो विचेतसो य एषाम् ।
विशाम् अधायि विश्पतिर् दुरोणे ऽग्निर् मन्द्रो मधुवचा ऋतावा ॥ ७ ००७ ०४
असादि वृतो वह्निर् आजगन्वान् अग्निर् ब्रह्मा नृषदने विधर्ता ।
द्यौश् च यम् पृथिवी वावृधाते आ यं होता यजति विश्ववारम् ॥ ७ ००७ ०५
एते द्युम्नेभिर् विश्वम् आतिरन्त मन्त्रं ये वारं नर्या अतक्षन् ।
प्र ये विशस् तिरन्त श्रोषमाणा आ ये मे अस्य दीधयन्न् ऋतस्य ॥ ७ ००७ ०६
नू त्वाम् अग्न ईमहे वसिष्ठा ईशानं सूनो सहसो वसूनाम् ।
इषं स्तोतृभ्यो मघवञ्छय आनड् यूयम् पात स्वस्तिभिः सदा नः ॥ ७ ००७ ०७

(५२४)

इन्धे राजा सम् अर्यो नमोभिर् यस्य प्रतीकम् आहुतं घृतेन ।
नरो हव्येभिर् ईळते सबाध आग्निर् अग्रं उषसाम् अशोचि ॥ ७ ००८ ०१
अयम् उ ष्य सुमहाँ अवेदि होता मन्द्रो मनुषो यह्वो अग्निः ।
वि भा अकः ससृजानः पृथिव्यां कृष्णप्विर् ओषधीभिर् ववक्षे ॥ ७ ००८ ०२
कया नो अग्ने वि वसः सुवृक्तिं काम् उ स्वधाम् ऋणवः शस्यमानः ।
कदा भवेम पतयः सुदत्र रायो वन्तारो दुष्टरस्य साधोः ॥ ७ ००८ ०३
प्र-प्रायम् अग्निर् भरतस्य शृण्वे वि यत् सूर्यो न रोचते बृहद् भाः ।
अभि यः पूरुम् पृतनासु तस्थौ द्युतानो दैव्यो अतिथिः शुशोच ॥ ७ ००८ ०४
असन्न् इत् त्वे आहवनानि भूरि भुवो विश्वेभिः सुमना अनीकैः ।
स्तुतश् चिद् अग्ने शृण्विषे गृणानः स्वयं वर्धस्व तन्वं सुजात ॥ ७ ००८ ०५
इदं वचः शतसाः संसहस्रम् उद् अग्नये जनिषीष्ट द्विबर्हाः ।
शं यत् स्तोतृभ्य आपये भवाति द्युमद् अमीवचातनं रक्षोहा ॥ ७ ००८ ०६
नू त्वाम् अग्न ईमहे वसिष्ठा ईशानं सूनो सहसो वसूनाम् ।
इषं स्तोतृभ्यो मघवञ्छय आनड् यूयम् पात स्वस्तिभिः सदा नः ॥ ७ ००८ ०७

(५२५)

अबोधि जार उषसाम् उपस्थाद् धोता मन्द्रः कवितमः पावकः ।
दधाति केतुम् उभयस्य जन्तोर् हव्या देवेषु द्रविणं सुकृत्सु ॥ ७ ००९ ०१
स सुक्रतुर् यो वि दुरः पणीनाम् पुनानो अर्कम् पुरुभोजसं नः ।
होता मन्द्रो विशां दमूनास् तिरस् तमो ददृशे राम्याणाम् ॥ ७ ००९ ०२
अमूरः कविर् अदितिर् विवस्वान् सुसंसन् मित्रो अतिथिः शिवो नः ।
चित्रभानुर् उषसाम् भात्य् अग्रेऽपां गर्भः प्रस्व१ आ विवेश ॥ ७ ००९ ०३
ईळेन्यो वो मनुषो युगेषु समनगा अशुचज् जातवेदाः ।
सुसंदृशा भानुना यो विभाति प्रति गावः समिधानम् बुधन्त ॥ ७ ००९ ०४
अग्ने याहि दूत्य१म् मा रिषण्यो देवाꣳ अच्छा ब्रह्मकृता गणेन ।
सरस्वतीम् मरुतो अश्विनापो यक्षि देवान् रत्नधेयाय विश्वान् ॥ ७ ००९ ०५
त्वाम् अग्ने समिधानो वसिष्ठो जरूथं हन् यक्षि राये पुरंधिम् ।
पुरुणीथा जातवेदो जरस्व यूयम् पात स्वस्तिभिः सदा नः ॥ ७ ००९ ०६

(५२६)

उषो न जारः पृथु पाजो अश्रेद् दविद्युतद् दीद्यच् छोशुचानः ।
वृषा हरिः शुचिर् आ भाति भासा धियो हिन्वान उशतीर् अजीगः ॥ ७ ०१० ०१
स्व१र् ण वस्तोर् उषसाम् अरोचि यज्ञं तन्वाना उशिजो न मन्म ।
अग्निर् जन्मानि देव आ वि विद्वान् द्रवद् दूतो देवयावा वनिष्ठः ॥ ७ ०१० ०२
अच्छा गिरो मतयो देवयन्तीर् अग्निं यन्ति द्रविणम् भिक्षमाणाः ।
सुसंदृशं सुप्रतीकं स्वञ्चं हव्यवाहम् अरतिम् मानुषाणाम् ॥ ७ ०१० ०३
इन्द्रं नो अग्ने वसुभिः सजोषा रुद्रं रुद्रेभिर् आ वहा बृहन्तम् ।
आदित्येभिर् अदितिं विश्वजन्याम् बृहस्पतिम् ऋक्वभिर् विश्ववारम् ॥ ७ ०१० ०४
मन्द्रं होतारम् उशिजो यविष्ठम् अग्निं विश ईळते अध्वरेषु ।
स हि क्षपावाꣳ अभवद् रयीणाम् अतन्द्रो दूतो यजथाय देवान् ॥ ७ ०१० ०५

(५२७)

महाँ अस्य् अध्वरस्य प्रकेतो न ऋते त्वद् अमृता मादयन्ते ।
आ विश्वेभिः सरथं याहि देवैर् न्य् अग्ने होता प्रथमः सदेह ॥ ७ ०११ ०१
त्वाम् ईळते अजिरं दूत्याय हविष्मन्तः सदम् इन् मानुषासः ।
यस्य देवैर् आसदो बर्हिर् अग्ने ऽहान्य् अस्मै सुदिना भवन्ति ॥ ७ ०११ ०२
त्रिश् चिद् अक्तोः प्र चिकितुर् वसूनि त्वे अन्तर् दाशुषे मर्त्याय ।
मनुष्वद् अग्न इह यक्षि देवान् भवा नो दूतो अभिशस्तिपावा ॥ ७ ०११ ०३
अग्निर् ईशे बृहतो अध्वरस्याग्निर् विश्वस्य हविषः कृतस्य ।
क्रतुं ह्य् अस्य वसवो जुषन्ताथा देवा दधिरे हव्यवाहम् ॥ ७ ०११ ०४
आग्ने वह हविरद्याय देवान् इन्द्रज्येष्ठास इह मादयन्ताम् ।
इमं यज्ञं दिवि देवेषु धेहि यूयम् पात स्वस्तिभिः सदा नः ॥ ७ ०११ ०५

(५२८)

अगन्म महा नमसा यविष्ठं यो दीदाय समिद्धः स्वे दुरोणे ।
चित्रभानुं रोदसी अन्तर् उर्वी स्वाहुतं विश्वतः प्रत्यञ्चम् ॥ ७ ०१२ ०१
स मह्ना विश्वा दुरितानि साह्वान् अग्नि ष्टवे दम आ जातवेदाः ।
स नो रक्षिषद् दुरिताद् अवद्याद् अस्मान् गृणत उत नो मघोनः ॥ ७ ०१२ ०२
त्वं वरुण उत मित्रो अग्ने त्वां वर्धन्ति मतिभिर् वसिष्ठाः ।
त्वे वसु सुषणनानि सन्तु यूयम् पात स्वस्तिभिः सदा नः ॥ ७ ०१२ ०३

(५२९)

प्राग्नये विश्वशुचे धियंधे ऽसुरघ्ने मन्म धीतिम् भरध्वम् ।
भरे हविर् न बर्हिषि प्रीणानो वैश्वानराय यतये मतीनाम् ॥ ७ ०१३ ०१
त्वम् अग्ने शोचिषा शोशुचान आ रोदसी अपृणा जायमानः ।
त्वं देवाँ अभिशस्तेर् अमुञ्चो वैश्वानर जातवेदो महित्वा ॥ ७ ०१३ ०२
जातो यद् अग्ने भुवना व्य् अख्यः पशून् न गोपा इर्यः परिज्मा ।

वैश्वानर ब्रह्मणे विन्द गातुं यूयम् पात स्वस्तिभिः सदा नः ॥ ७ ०१३ ०३

(५३०)

समिधा जातवेदसे देवाय देवहूतिभिः ।
हविर्भिः शुक्रशोचिषे नमस्विनो वयं दाशेमाग्नये ॥ ७ ०१४ ०१
वयं ते अग्ने समिधा विधेम वयं दाशेम सुष्टुती यजत्र ।
वयं घृतेनाध्वरस्य होतर् वयं देव हविषा भद्रशोचे ॥ ७ ०१४ ०२
आ नो देवेभिर् उप देवहूतिम् अग्ने याहि वषट्कृतिं जुषाणः ।
तुभ्यं देवाय दाशतः स्याम यूयम् पात स्वस्तिभिः सदा नः ॥ ७ ०१४ ०३

(५३१)

उपसद्याय मीळ्हुष आस्ये जुहुता हविः ।
यो नो नेदिष्ठम् आप्यम् ॥ ७ ०१५ ०१
यः पञ्च चर्षणीर् अभि निषसाद दमे-दमे ।
कविर् गृहपतिर् युवा ॥ ७ ०१५ ०२
स नो वेदो अमात्यम् अग्नी रक्षतु विश्वतः ।
उतास्मान् पात्व् अंहसः ॥ ७ ०१५ ०३
नवं नु स्तोमम् अग्नये दिवः श्येनाय जीजनम् ।
वस्वः कुविद् वनाति नः ॥ ७ ०१५ ०४
स्पार्हा यस्य श्रियो दृशे रयिर् वीरवतो यथा ।
अग्रे यज्ञस्य शोचतः ॥ ७ ०१५ ०५
सेमां वेतु वषट्कृतिम् अग्निर् जुषत नो गिरः ।
यजिष्ठो हव्यवाहनः ॥ ७ ०१५ ०६
नि त्वा नक्ष्य विश्पते द्युमन्तं देव धीमहि ।
सुवीरम् अग्न आहुत ॥ ७ ०१५ ०७
क्षप उस्रश् च दीदिहि स्वग्नयस् त्वया वयम् ।
सुवीरस् त्वम् अस्मयुः ॥ ७ ०१५ ०८

उप॑ त्वा सा॒तये॒ नरो॒ विप्रा॑सो यन्ति धी॒तिभिः॑ ।
उपाक्षा॑रा सहस्रिणी॑ ॥ ७ ०१५ ०९
अ॒ग्नी रक्षा॑सि सेधति शु॒क्रशो॑चिर् अमर्त्यः ।
शुचिः॑ पाव॒क ईड्यः॑ ॥ ७ ०१५ १०
स नो॒ राधां॑स्य् आ भरेशा॑नः सहसो यहो ।
भग॑श् च दातु वार्यम् ॥ ७ ०१५ ११
त्वम् अ॑ग्ने वी॒रव॒द् यशो॑ दे॒वश् च॑ सवि॒ता भगः॑ ।
दिति॑श् च दाति॒ वार्यम् ॥ ७ ०१५ १२
अग्ने॒ रक्षा॑ णो॒ अंह॑सः प्रति॑ ष्म देव रीष॑तः ।
तपि॑ष्ठैर् अजरो॑ दह ॥ ७ ०१५ १३
अधा॑ म॒ही न॒ आय॑स्य् अनाधृ॒ष्टो नृपी॑तये ।
पूर् भ॑वा श॒तभु॑जिः ॥ ७ ०१५ १४
त्वं नः॑ पाह्य् अंह॑सो दोषा॑वस्तर् अघाय॒तः ।
दिवा॒ नक्तम् अदाभ्य ॥ ७ ०१५ १५

(५३२) एना वो॑ अ॒ग्निं नम॑सो॒र्जो नपा॑तम् आ हुवे ।
प्रि॒यं चेति॑ष्ठम् अर॒तिं स्व॑ध्व॒रं विश्व॑स्य दू॒तम् अ॒मृत॑म् ॥ ७ ०१६ ०१
स यो॑जते अरु॒षा वि॒श्वभो॑जसा॒ स दु॑द्र॒वत् स्वा॑हुतः ।
सु॒ब्रह्मा॑ य॒ज्ञः सु॒शमी॒ वसू॑नां दे॒वं रा॒धो जना॑नाम् ॥ ७ ०१६ ०२
उद् अ॑स्य शो॒चिर् अ॑स्थाद् आजु॒ह्वा॑नस्य मी॒ळ्हुषः॑ ।
उद् धू॒मासो॑ अरु॒षासो॑ दिवि॒स्पृशः॒ सम् अ॒ग्निम् इ॑न्धते नरः॑ ॥ ७ ०१६ ०३
तं त्वा॑ दू॒तं कृ॑ण्महे य॒शस्त॑मं दे॒वाँ आ वी॒तये॑ वह ।
विश्वा॑ सूनो सहसो मर्त॒भोज॑ना रास्व॒ तद् यत् त्वेम॑हे ॥ ७ ०१६ ०४
त्वम् अ॑ग्ने गृ॒हप॑ति॒स् त्वं होता॑ नो अध्व॒रे ।
त्वम् पोता॑ विश्ववार॒ प्रचे॑ता॒ यक्षि॑ वेषि॑ च॒ वार्यम् ॥ ७ ०१६ ०५
कृ॒धि र॒त्नं यज॑मानाय सुक्रतो॒ त्वं हि र॑त्न॒धा असि॑ ।
आ न॑ ऋ॒ते शि॑शीहि॒ विश्व॑म् ऋ॒त्विज॑ सु॒शंसो॒ यश् च॒ दक्ष॑ते ॥ ७ ०१६ ०६

त्वे अग्ने स्वाहुत प्रियासः सन्तु सूरयः ।
यन्तारो ये मघवानो जनानाम् ऊर्वान् दयन्त गोनाम् ॥ ७ ०१६ ०७
येषाम् इळा घृतहस्ता दुरोण आँ अपि प्राता निषीदति ।
तांस् त्रायस्व सहस्य द्रुहो निदो यच्छा नः शर्म दीर्घश्रुत् ॥ ७ ०१६ ०८
स मन्द्रया च जिह्वया वह्निर् आसा विदुष्टरः ।
अग्ने रयिम् मघवद्भ्यो न आ वह हव्यदातिं च सूदय ॥ ७ ०१६ ०९
ये राधांसि ददत्य् अश्व्या मघा कामेन श्रवसो महः ।
ताँ अंहसः पिपृहि पर्तृभिष् ट्वं शतम् पूर्भिर् यविष्ठ्य ॥ ७ ०१६ १०
देवो वो द्रविणोदाः पूर्णां विवष्ट्य् आसिचम् ।
उद् वा सिञ्चध्वम् उप वा पृणध्वम् आद् इद् वो देव ओहते ॥ ७ ०१६ ११
तं होतारम् अध्वरस्य प्रचेतसं वह्निं देवा अकृण्वत ।
दधाति रत्नं विधते सुवीर्यम् अग्निर् जनाय दाशुषे ॥ ७ ०१६ १२

(५३३)

अग्ने भव सुषमिधा समिद्ध उत बर्हिर् उर्विया वि स्तृणीताम् ॥ ७ ०१७ ०१
उत द्वार उशतीर् वि श्रयन्ताम् उत देवाँ उशत आ वहेह ॥ ७ ०१७ ०२
अग्ने वीहि हविषा यक्षि देवान् स्वध्वरा कृणुहि जातवेदः ॥ ७ ०१७ ०३
स्वध्वरा करति जातवेदा यक्षद् देवाँ अमृतान् पिप्रयच् च ॥ ७ ०१७ ०४
वंस्व विश्वा वार्याणि प्रचेतः सत्या भवन्त्व् आशिषो नो अद्य ॥ ७ ०१७ ०५
त्वाम् उ ते दधिरे हव्यवाहं देवासो अग्न ऊर्ज आ नपातम् ॥ ७ ०१७ ०६
ते ते देवाय दाशतः स्याम महो नो रत्ना वि दध इयानः ॥ ७ ०१७ ०७

(५३४)

त्वे ह यत् पितरश् चिन् न इन्द्र विश्वा वामा जरितारो असन्वन् ।
त्वे गावः सुदुघास् त्वे ह्व अश्वास् त्वं वसु देवयते वनिष्ठः ॥ ७ ०१८ ०१
राजेव हि जनिभिः क्षेष्य् एवाव द्युभिर् अभि विदुष् कविः सन् ।

पिशा गिरो मघवन् गोभिर् अश्वैस् त्वायतः शिशीहि राये अस्मान् ॥ ७ ०१८ ०२
इमा उ त्वा पस्पृधानासो अत्र मन्द्रा गिरो देवयन्तीर् उप स्थुः ।
अर्वाची ते पथ्या राय एतु स्याम ते सुमताव् इन्द्र शर्मन् ॥ ७ ०१८ ०३
धेनुं न त्वा सूयवसे दुदुक्षन्न् उप ब्रह्माणि ससृजे वसिष्ठः ।
त्वाम् इन् मे गोपतिं विश्व आहा न इन्द्रः सुमतिं गन्त्व् अच्छ ॥ ७ ०१८ ०४
अणाँसि चित् पप्रथाना सुदास इन्द्रो गाधान्य् अकृणोत् सुपारा ।
शर्धन्तं शिम्युम् उचथस्य नव्यः शापं सिन्धूनाम् अकृणोद् अशस्तीः ॥ ७ ०१८ ०५
पुरोळा इत् तुर्वशो यक्षुर् आसीद् राये मत्स्यासो निशिता अपीव ।
श्रुष्टिं चक्रुर् भृगवो द्रुह्यवश् च सखा सख्यायम् अतरद् विषूचोः ॥ ७ ०१८ ०६
आ पक्थासो भलानसो भनन्तालिनासो विषाणिनः शिवासः ।
आ यो ऽनयत् सधमा आर्यस्य गव्या तृत्सुभ्यो अजगन् युधा नॄन् ॥ ७ ०१८ ०७
दुराध्यो ३ अदितिं स्रेवयन्तो ऽचेतसो वि जगृभ्रे परुष्णीम् ।
मूहाविव्यक् पृथिवीम् पत्यमानः पशुष् कविर् अशयच् चायमानः ॥ ७ ०१८ ०८
ईयुर् अर्थं न न्यर्थम् परुष्णीम् आशुश् चनेद् अभिपित्वं जगाम ।
सुदास इन्द्रः सुतुकाँ अमित्रान् अरन्धयन् मानुषे वध्रिवाचः ॥ ७ ०१८ ०९
ईयुर् गावो न यवसाद् अगोपा यथाकृतम् अभि मित्रं चितासः ।
पृश्निगावः पृश्निनिप्रेषितासः श्रुष्टिं चक्रुर् नियुतो रन्तयश् च ॥ ७ ०१८ १०
एकं च यो विंशतिं च श्रवस्या वैकर्णयोर् जनान् राजा न्य् अस्तः ।
दस्मो न सद्मन् नि शिशाति बर्हिः शूरः सर्गम् अकृणोद् इन्द्र एषाम् ॥ ७ ०१८ ११
अध श्रुतं कवषं वृद्धम् अप्स्व् अनु द्रुह्युं नि वृणग् वज्रबाहुः ।
वृणाना अत्र सख्याय सख्यं त्वायन्तो ये अमदन्न् अनु त्वा ॥ ७ ०१८ १२
वि सद्यो विश्वा दृंहितान्य् एषाम् इन्द्रः पुरः सहसा सप्त दर्दः ।
व्य् आनवस्य तृत्सवे गयम् भाग् जेष्म पुरं विदथे मुध्रवाचम् ॥ ७ ०१८ १३
नि गव्यवो ऽनवो द्रुह्यवश् च षष्टिः शता सुषुपुः षट् सहस्रा ।
षष्टिर् वीरासो अधि षड् दुवोयु विश्वेद् इन्द्रस्य वीर्या कृतानि ॥ ७ ०१८ १४
इन्द्रेणैते तृत्सवो वेविषाणा आपो न सृष्टा अधवन्त नीचीः ।
दुर्मित्रासः प्रकलविन् मिमाना जहुर् विश्वानि भोजना सुदासे ॥ ७ ०१८ १५
अर्धं वीरस्य शृतपाम् अनिन्द्रम् परा शर्धन्तं नुनुदे अभि क्षाम् ।

इन्द्रो॑ म॒न्युम् म॑न्यु॒म्यो मिमाय भे॒जे प॒थो व॑र्त॒निम् पत्य॑मानः ॥ ७ ०१८ १६
आ॒ध्रेण॑ चि॒त् तद् व् एकं॑ चकार सिं॒ह्यं चि॒त् पेत्वे॑ना जघान ।
अव॑ स्र॒क्तीर् वे॒श्यावृश्च॒द् इन्द्रः॒ प्राय॑च्छ॒द् विश्वा॒ भोज॑ना सु॒दासे॑ ॥ ७ ०१८ १७
शश्व॑न्तो॒ हि शत्र॑वो रार॒धुष् टे॑ भे॒दस्य॑ चि॒च् छर्ध॑तो विन्द॒ रन्धि॑म् ।
मर्ता॒ँ एन॑ स्तुव॒तो यः कृ॒णोति॑ ति॒ग्मं तस्मि॒न् नि ज॑हि॒ वज्र॑म् इन्द्र ॥ ७ ०१८ १८
आव॒द् इन्द्रं॑ य॒मुना॒ तृत्स॑वश् च॒ प्रात्र॑ भे॒दं स॒र्वता॑ता मुषायत् ।
अ॒जास॑श् च॒ शिग्र॑वो॒ यक्ष॑वश् च ब॒लिं शी॒र्षाणि॑ जभ्रु॒र् अश्व्या॑नि ॥ ७ ०१८ १९
न त॑ इन्द्र सुम॒तयो॒ न रायः॑ सं॒चक्षे॒ पूर्वा॑ उ॒षसो॒ न नूत्नाः॑ ।
देव॑कं चिन् मान्यमा॒नं ज॑घ॒न्थाव॒ त्मना॑ बृह॒तः शम्ब॑रम् भेत् ॥ ७ ०१८ २०
प्र ये गृ॒हाद् अम॑मदुस् त्वा॒या प॑राश॒रः श॒तया॑तु॒र् वसि॑ष्ठः ।
न ते॑ भो॒जस्य॑ स॒ख्यम् मृ॑ष॒न्ताधा॑ सू॒रिभ्यः॑ सु॒दिना॒ व्य् उच्छान् ॥ ७ ०१८ २१
द्वे नप्तु॑र् दे॒वव॑तः श॒ते गोर् द्वा रथा॑ व॒धूम॑न्ता सु॒दासः॑ ।
अर्ह॑न्न् अग्ने पैजव॒नस्य॒ दानं॒ होते॑व॒ सद्म॒ पर्य् ए॑मि॒ रेभ॑न् ॥ ७ ०१८ २२
च॒त्वारो॑ मा पैजव॒नस्य॒ दाना॒ः स्मद्दि॑ष्टयः कृश॒निनो॑ निरे॒के ।
ऋ॒ज्रासो॑ मा पृथिवि॒ष्ठाः सु॒दास॑स् तो॒कं तो॒काय॒ श्रव॑से वहन्ति ॥ ७ ०१८ २३
यस्य॒ श्रवो॒ रोद॑सी अ॒न्तर् उ॒र्वी शी॒र्ष्णे-शी॑र्ष्णे विब॒भाजा॑ विभ॒क्ता ।
स॒प्तेद् इन्द्रं॒ न स्र॒वतो॑ गृणन्ति॒ नि यु॑ध्याम॒धिम् अ॑शिशाद् अ॒भीके॑ ॥ ७ ०१८ २४
इ॒मं न॑रो मरुतः सश्च॒तानु॒ दिवो॑दासं॒ न पि॒तरं॑ सु॒दासः॑ ।
अ॒वि॒ष्टना॑ पैजव॒नस्य॒ केतं॑ दू॒णाशं॑ क्ष॒त्रम् अ॒जरं॑ दुवो॒यु ॥ ७ ०१८ २५

(५३५)

यस् ति॒ग्मशृ॑ङ्गो वृष॒भो न भी॒म एकः॑ कृ॒ष्टीश् च्या॒वय॑ति॒ प्र विश्वाः॑ ।
यः शश्व॑तो॒ अदा॑शुषो॒ गय॑स्य प्रय॒न्तासि॒ सुष्वि॑तराय॒ वेदः॑ ॥ ७ ०१९ ०१
त्वं ह॒ त्यद् इ॑न्द्र॒ कुत्स॑म् आवः॒ शुश्रू॑षमाणस् त॒न्वा सम॒र्ये ।
दासं॒ यच् छुष्णं॒ कुय॑वं॒ न्य् अस्मा॒ अर॑न्धय आर्जुने॒याय॒ शिक्ष॑न् ॥ ७ ०१९ ०२
त्वं धृ॑ष्णो धृष॒ता वी॒तह॑व्य॒म् प्रावो॒ विश्वा॑भिर् ऊ॒तिभिः॑ सु॒दास॑म् ।
प्र पौरु॑कुत्सिं त्र॒सद॑स्युम् आवः॒ क्षेत्र॑साता वृत्र॒हत्ये॑षु पू॒रुम् ॥ ७ ०१९ ०३

त्वं नृभिर् नृमणो देववीतौ भूरीणि वृत्रा हर्यश्व हंसि ।
त्वं नि दस्युं चुमुरिं धुनिं चास्वापयो दभीतये सुहन्तु ॥ ७ ०१९ ०४
तव च्यौत्नानि वज्रहस्त तानि नव यत् पुरो नवतिं च सद्यः ।
निवेशने शततमाविवेषीर् अहञ् च वृत्रं नमुचिम् उताहन् ॥ ७ ०१९ ०५
सना ता त इन्द्र भोजनानि रातहव्याय दाशुषे सुदासे ।
वृष्णे ते हरी वृषणा युनज्मि व्यन्तु ब्रह्माणि पुरुशाक वाजम् ॥ ७ ०१९ ०६
मा ते अस्यां सहसावन् परिष्टाव् अघाय भूम हरिवः परादै ।
त्रायस्व नो ऽवृकेभिर् वरूथैस् तव प्रियासः सूरिषु स्याम ॥ ७ ०१९ ०७
प्रियास इत् ते मघवन्न् अभिष्टौ नरो मदेम शरणे सखायः ।
नि तुर्वशं नि याद्वं शिशीह्य् अतिथिग्वाय शंस्यं करिष्यन् ॥ ७ ०१९ ०८
सद्यश् चिन् नु ते मघवन्न् अभिष्टौ नरः शंसन्त्य् उक्थशास उक्था ।
ये ते हवेभिर् वि पणीर् अदाशन्न् अस्मान् वृणीष्व युज्याय तस्मै ॥ ७ ०१९ ०९
एते स्तोमा नरां नृतम तुभ्यम् अस्मद्र्यञ्चो ददतो मघानि ।
तेषाम् इन्द्र वृत्रहत्ये शिवो भूः सखा च शूरो ऽविता च नृणाम् ॥ ७ ०१९ १०
नू इन्द्र शूर स्तवमान ऊती ब्रह्मजूतस् तन्वा वावृधस्व ।
उप नो वाजान् मिमीह्य् उप स्तीन् यूयम् पात स्वस्तिभिः सदा नः ॥ ७ ०१९ ११

(५३६)

उग्रो जज्ञे वीर्याय स्वधावाञ् चक्रिर् अपो नर्यो यत् करिष्यन् ।
जग्मिर् युवा नृषदनम् अवोभिस् त्राता न इन्द्र एनसो महश् चित् ॥ ७ ०२० ०१
हन्ता वृत्रम् इन्द्रः शूशुवानः प्रावीन् नु वीरो जरितारम् ऊती ।
कर्ता सुदासे अह वा उलोकं दाता वसु मुहुर् आ दाशुषे भूत् ॥ ७ ०२० ०२
युध्मो अनर्वा खजकृत् समद्वा शूरः सत्राषाड् जनुषेम् अषाळ्हः ।
व्य् आस इन्द्रः पृतनाः स्वोजा अधा विश्वं शत्रूयन्तं जघान ॥ ७ ०२० ०३
उभे चिद् इन्द्र रोदसी महित्वा पप्राथ तविषीभिस् तुविष्मः ।
नि वज्रम् इन्द्रो हरिवान् मिमिक्षन् सम् अन्धसा मदेषु वा उवोच ॥ ७ ०२० ०४
वृषा जजान वृषणं रणाय तम् उ चिन् नारी नयं ससूव ।

प्र यः सेनानीर् अध नृभ्यो अस्तीनः सत्वा गवेषणः स धृष्णुः ॥ ७ ०२० ०५
नू चित् स भ्रेषते जनो न रेषन् मनो यो अस्य घोरम् आविवासात् ।
यज्ञैर् य इन्द्रे दधते दुवांसि क्षयत् स राय ऋतपा ऋतेजाः ॥ ७ ०२० ०६
यद् इन्द्र पूर्वो अपराय शिक्षन्न् अयज् ज्यायान् कनीयसो देष्णम् ।
अमृत इत् पर्य् आसीत दूरम् आ चित्र चित्र्यम् भरा रयिं नः ॥ ७ ०२० ०७
यस् त इन्द्र प्रियो जनो ददाशद् असन् निरेके अद्रिवः सखा ते ।
वयं ते अस्यां सुमतौ चनिष्ठाः स्याम वरूथे अघ्नतो नृपीतौ ॥ ७ ०२० ०८
एष स्तोमो अचिक्रदद् वृषा त उत स्तामुर् मघवन्न् अक्रपिष्ट ।
रायस् कामो जरितार त आगन् त्वम् अङ्ग शक्र वस्व आ शको नः ॥ ७ ०२० ०९
स न इन्द्र त्वयताया इषे धास् त्मना च ये मघवानो जुनन्ति ।
वस्वी षु ते जरित्रे अस्तु शक्तिर् यूयम् पात स्वस्तिभिः सदा नः ॥ ७ ०२० १०

(५३७)

असावि देवं गोऋजीकम् अन्धो न्य् अस्मिन्न् इन्द्रो जनुषेम् उवोच ।
बोधामसि त्वा हर्यश्व यज्ञैर् बोधा न स्तोमम् अन्धसो मदेषु ॥ ७ ०२१ ०१
प्र यन्ति यज्ञं विपयन्ति बर्हिः सोममादो विदथे दुध्रवाचः ।
न्य् उ भ्रियन्ते यशसो गृभाद् आ दूरऽउपब्दो वृषणो नृषाचः ॥ ७ ०२१ ०२
त्वम् इन्द्र स्रवितवा अपस् कः परिष्ठिता अहिना शूर पूर्वीः ।
त्वद् वावक्रे रथ्यो३ न धेना रेजन्ते विश्वा कृत्रिमाणि भीषा ॥ ७ ०२१ ०३
भीमो विविषायुधेभिर् एषाम् अपांसि विश्वा नर्याणि विद्वान् ।
इन्द्रः पुरो जर्हृषाणो वि दूधोद् वि वज्रहस्तो महिना जघान ॥ ७ ०२१ ०४
न यातव इन्द्र जूजुवुर् नो न वन्दना शविष्ठ वेद्याभिः ।
स शर्धद् अर्यो विषुणस्य जन्तोर् मा शिश्नदेवा अपि गुर् ऋतं नः ॥ ७ ०२१ ०५
अभि क्रत्वेन्द्र भूर् अध ज्मन् न ते विव्यङ् महिमानं रजांसि ।
स्वेना हि वृत्रं शवसा जघन्थ न शत्रुर् अन्तं विविदद् युधा ते ॥ ७ ०२१ ०६
देवाश् चित् ते असुर्याय पूर्वे ऽनु क्षत्राय ममिरे सहांसि ।
इन्द्रो मघानि दयते विषह्येन्द्रं वाजस्य जोहुवन्त सातौ ॥ ७ ०२१ ०७

कीरिश् चिद् धि त्वाम् अवसे जुहावेशानम् इन्द्र सौभगस्य भूरेः ।
अवो बभूथ शतमूते अस्मे अभिक्षत्तुस् त्वावतो वृता ॥ ७ ०२१ ०८
सखायस् त इन्द्र विश्वह स्याम नमोवृधासो महिना तरुत्र ।
वन्वन्तु स्मा ते ऽवसा समीके ऽभीतिम् अर्यो वनुषां शवांसि ॥ ७ ०२१ ०९
स न इन्द्र त्वयताया इषे धास् त्मना च ये मघवानो जुनन्ति ।
वस्वी षु ते जरित्रे अस्तु शक्तिर् यूयम् पात स्वस्तिभिः सदा नः ॥ ७ ०२१ १०

(५३८)

पिबा सोमम् इन्द्र मन्दतु त्वा यं ते सुषाव हर्यश्वाद्रिः ।
सोतुर् बाहुभ्यां सुयतो नार्वा ॥ ७ ०२२ ०१
यस् ते मदो युज्यश् चारुर् अस्ति येन वृत्राणि हर्यश्व हंसि ।
स त्वाम् इन्द्र प्रभूवसो ममत्तु ॥ ७ ०२२ ०२
बोधा सु मे मघवन् वाचम् एमां यां ते वसिष्ठो अर्चति प्रशस्तिम् ।
इमा ब्रह्म सधमादे जुषस्व ॥ ७ ०२२ ०३
श्रुधी हवं विपिपानस्यार्देर् बोधा विप्रस्यार्चतो मनीषाम् ।
कृष्वा दुवांस्य् अन्तमा सचेमा ॥ ७ ०२२ ०४
न ते गिरो अपि मृष्ये तुरस्य न सुष्टुतिम् असुर्यस्य विद्वान् ।
सदा ते नाम स्वयशो विवक्मि ॥ ७ ०२२ ०५
भूरि हि ते सवना मानुषेषु भूरि मनीषी हवते त्वाम् इत् ।
मारे अस्मन् मघवञ् ज्योक् कः ॥ ७ ०२२ ०६
तुभ्येद् इमा सवना शूर विश्वा तुभ्यम् ब्रह्माणि वर्धना कृणोमि ।
त्वं नृभिर् हव्यो विश्वधासि ॥ ७ ०२२ ०७
नू चिन् नु ते मन्यमानस्य दस्मोद् अश्नुवन्ति महिमानम् उग्र ।
न वीर्यम् इन्द्र ते न राधः ॥ ७ ०२२ ०८
ये च पूर्व ऋषयो ये च नूना इन्द्र ब्रह्माणि जनयन्त विप्राः ।
अस्मे ते सन्तु सख्या शिवानि यूयम् पात स्वस्तिभिः सदा नः ॥ ७ ०२२ ०९

(५३९)

उद् उ ब्रह्माण्य् ऐरत श्रवस्येन्द्रं समर्ये महया वसिष्ठ ।
आ यो विश्वानि शवसा ततानोपश्रोता म ईवतो वचांसि ॥ ७ ०२३ ०१
अयामि घोष इन्द्र देवजामिर् इरज्यन्त यच् छुरुधो विवाचि ।
नहि स्वम् आयुश् चिकिते जनेषु तानीद् अंहांस्य् अति पर्ष्य् अस्मान् ॥ ७ ०२३ ०२
युजे रथं गवेषणं हरिभ्याम् उप ब्रह्माणि जुजुषाणम् अस्थुः ।
वि बाधिष्ट स्य रोदसी महित्वेन्द्रो वृत्राण्य् अप्रती जघन्वान् ॥ ७ ०२३ ०३
आपश् चित् पिप्यु स्तर्यो ३ न गावो नक्षन्न् ऋतं जरितारस् त इन्द्र ।
याहि वायुर् न नियुतो नो अच्छा त्वं हि धीभिर् दयसे वि वाजान् ॥ ७ ०२३ ०४
ते त्वा मदा इन्द्र मादयन्तु शुष्मिणं तुविराधसं जरित्रे ।
एको देवत्रा दयसे हि मर्तान् अस्मिञ् छूर सवने मादयस्व ॥ ७ ०२३ ०५
एवेद् इन्द्रं वृषणं वज्रबाहुं वसिष्ठासो अभ्य् अर्चन्त्य् अर्कैः ।
स न स्तुतो वीरवद् धातु गोमद् यूयम् पात स्वस्तिभिः सदा नः ॥ ७ ०२३ ०६

(५४०)

योनिष् ट इन्द्र सदने अकारि तम् आ नृभिः पुरुहूत प्र याहि ।
असो यथा नो ऽविता वृधे च ददो वसूनि ममदश् च सोमैः ॥ ७ ०२४ ०१
गृभीतं ते मन इन्द्र द्विबर्हाः सुतः सोमः परिषिक्ता मधूनि ।
विसृष्टधेना भरते सुवृक्तिर् इयम् इन्द्रं जोहुवती मनीषा ॥ ७ ०२४ ०२
आ नो दिव आ पृथिव्या ऋजीषिन्न् इदम् बर्हिः सोमपेयाय याहि ।
वहन्तु त्वा हरयो मद्रयञ्चम् आङ्गूषम् अच्छा तवसम् मदाय ॥ ७ ०२४ ०३
आ नो विश्वाभिर् ऊतिभिः सजोषा ब्रह्म जुषाणो हर्यश्व याहि ।
वरीवृजत् स्थविरेभिः सुशिप्रास्मे दधद् वृषणं शुष्मम् इन्द्र ॥ ७ ०२४ ०४
एष स्तोमो मह उग्राय वाहे धुरी ३ वात्यो न वाजयन्न् अधायि ।
इन्द्र त्वायम् अर्क ईट्टे वसूनां दिवीव द्याम् अधि नः श्रोमतं धाः ॥ ७ ०२४ ०५
एवा न इन्द्र वार्यस्य पूर्धि प्र ते महीं सुमतिं वेविदाम ।

इषम् पिन्व मघवञ्छयः सुवीरा यूयम् पात स्वस्तिभिः सदा नः ॥ ७ ०२४ ०६

(५४१)

आ ते मह इन्द्रोत्य् उग्र समन्यवो यत् समरन्त सेनाः ।
पतति दिद्युन् नर्यस्य बाह्वोर् मा ते मनो विष्वद्र्य १ ग् वि चारीत् ॥ ७ ०२५ ०१
नि दुर्ग इन्द्र श्नथिह्य् अमित्रान् अभि ये नो मतासो अमन्ति ।
आरे तं शंस कृणुहि निनित्सोर् आ नो भर सम्भरणं वसूनाम् ॥ ७ ०२५ ०२
शतं ते शिप्रिन्न् ऊतयः सुदासे सहस्रं शंसा उत रातिर् अस्तु ।
जहि वधर् वनुषो मर्त्यस्यास्मे द्युम्नम् अधि रत्नं च धेहि ॥ ७ ०२५ ०३
त्वावतो हीन्द्र क्रत्वे अस्मि त्वावतो ऽवितुः शूर रातौ ।
विश्वेद् अहानि तविषीव उग्रोकः कृणुष्व हरिवो न मर्धीः ॥ ७ ०२५ ०४
कुत्सा एते हर्यश्वाय शूषम् इन्द्रे सहो देवजूतम् इयानाः ।
सत्रा कृधि सुहना शूर वृत्रा वयं तरुत्राः सनुयाम वाजम् ॥ ७ ०२५ ०५
एवा न इन्द्र वार्यस्य पूर्धि प्र ते महीं सुमतिं वेविदाम ।
इषम् पिन्व मघवञ्छयः सुवीरा यूयम् पात स्वस्तिभिः सदा नः ॥ ७ ०२५ ०६

(५४२)

न सोम इन्द्रम् असुतो ममाद नाब्रह्माणो मघवानं सुतासः ।
तस्मा उक्थं जनये यज् जुजोषन् नुवन् नवीयः शृणवद् यथा नः ॥ ७ ०२६ ०१
उक्थ-उक्थे सोम इन्द्रम् ममाद नीथे-नीथे मघवानं सुतासः ।
यद् ईं सबाधः पितरं न पुत्राः समानदक्षा अवसे हवन्ते ॥ ७ ०२६ ०२
चकार ता कृणवन् नूनम् अन्या यानि ब्रुवन्ति वेधसः सुतेषु ।
जनीर् इव पतिर् एकः समानो नि मामृजे पुर इन्द्रः सु सर्वाः ॥ ७ ०२६ ०३
एवा तम् आहुर् उत शृण्व इन्द्र एको विभक्ता तरणिर् मघानाम् ।
मिथस्तुर ऊतयो यस्य पूर्वीर् अस्मे भद्राणि सश्चत प्रियाणि ॥ ७ ०२६ ०४
एवा वसिष्ठ इन्द्रम् ऊतये नॄन् कृष्टीनां वृषभं सुते गृणाति ।

सहस्रिण उप नो माहि वाजान् यूयम् पात स्वस्तिभिः सदा नः ॥ ७ ०२६ ०५

(५४३)

इन्द्रं नरो नेमधिता हवन्ते यत् पार्या युनजते धियस् ताः ।
शूरो नृषाता शवसश् चकान आ गोमति व्रजे भजा त्वं नः ॥ ७ ०२७ ०१
य इन्द्र शुष्मो मघवन् ते अस्ति शिक्षा सखिभ्यः पुरुहूत नृभ्यः ।
त्वं हि दृळ्हा मघवन् विचेता अपा वृधि परिवृतं न राधः ॥ ७ ०२७ ०२
इन्द्रो राजा जगतश् चर्षणीनाम् अधि क्षमि विषुरूपं यद् अस्ति ।
ततो ददाति दाशुषे वसूनि चोदद् राध उपस्तुतश् चिद् अर्वाक् ॥ ७ ०२७ ०३
नू चिन् न इन्द्रो मघवा सहूती दानो वाजं नि यमते न ऊती ।
अनूना यस्य दक्षिणा पीपाय वामं नृभ्यो अभिवीता सखिभ्यः ॥ ७ ०२७ ०४
नू इन्द्र राये वरिवस् कृधी न आ ते मनो ववृत्याम मघाय ।
गोमद् अश्वावद् रथवद् व्यन्तो यूयम् पात स्वस्तिभिः सदा नः ॥ ७ ०२७ ०५

(५४४)

ब्रह्मा ण इन्द्रोप याहि विद्वान् अर्वाञ्चस् ते हरयः सन्तु युक्ताः ।
विश्वे चिद् धि त्वा विहवन्त मर्ता अस्माकम् इच् छृणुहि विश्वमिन्व ॥ ७ ०२८ ०१
हवं त इन्द्र महिमा व्य् आनड् ब्रह्म यत् पासि शवसिन्न् ऋषीणाम् ।
आ यद् वज्रं दधिषे हस्त उग्र घोरः सन् क्रत्वा जनिष्ठा अषाळ्हः ॥ ७ ०२८ ०२
तव प्रणीतीन्द्र जोहुवानान् सं यन् नॄन् न रोदसी निनेथ ।
महे क्षत्राय शवसे हि जज्ञे ऽतूतुजिं चित् तूतुजिर् अशिश्नत् ॥ ७ ०२८ ०३
एभिर् न इन्द्राहभिर् दशस्य दुर्मित्रासो हि क्षितयः पवन्ते ।
प्रति यच् चष्टे अनृतम् अनेना अव द्रुता वरुणो मायी नः सात् ॥ ७ ०२८ ०४
वोचेमेद् इन्द्रम् मघवानम् एनम् महो रायो राधसो यद् ददन् नः ।
यो अर्चतो ब्रह्मकृतिम् अविष्ठो यूयम् पात स्वस्तिभिः सदा नः ॥ ७ ०२८ ०५

(५४५)

अयं सोम इन्द्र तुभ्यं सुन्व आ तु प्र याहि हरिवस् तदोकाः ।
पिबा त्व् अ १ स्य सुषुतस्य चारोर् ददो मघानि मघवन्न् इयानः ॥ ७ ०२९ ०१
ब्रह्मन् वीर ब्रह्मकृतिं जुषाणो ऽर्वाचीनो हरिभिर् याहि तूयम् ।
अस्मिन्न् ऊ षु सवने मादयस्वोप ब्रह्माणि शृणव इमा नः ॥ ७ ०२९ ०२
का ते अस्त्य् अरंकृतिः सूक्तैः कदा नूनं ते मघवन् दाशेम ।
विश्वा मतीर् आ ततने त्वायाधा म इन्द्र शृणवो हवेमा ॥ ७ ०२९ ०३
उतो घा ते पुरुष्या ३ इद् आसन् येषाम् पूर्वेषाम् अशृणोर् ऋषीणाम् ।
अधाहं त्वा मघवञ् जोहवीमि त्वं न इन्द्रासि प्रमतिः पितेव ॥ ७ ०२९ ०४
वोचेमेद् इन्द्रम् मघवानम् एनम् महो रायो राधसो यद् ददन् नः ।
यो अर्चतो ब्रह्मकृतिम् अविष्ठो यूयम् पात स्वस्तिभिः सदा नः ॥ ७ ०२९ ०५

(५४६)

आ नो देव शवसा याहि शुष्मिन् भवा वृध इन्द्र रायो अस्य ।
महे नृम्णाय नृपते सुवज्र महि क्षत्राय पौंस्याय शूर ॥ ७ ०३० ०१
हवन्त उ त्वा हव्यं विवाचि तनूषु शूराः सूर्यस्य सातौ ।
त्वं विश्वेषु सेन्यो जनेषु त्वं वृत्राणि रन्धया सुहन्तु ॥ ७ ०३० ०२
अहा यद् इन्द्र सुदिना व्युच्छान् दधो यत् केतुम् उपमं समत्सु ।
न्य् अ १ ग्निः सीदद् असुरो न होता हुवानो अत्र सुभगाय देवान् ॥ ७ ०३० ०३
वयं ते त इन्द्र ये च देव स्तवन्त शूर ददतो मघानि ।
यच्छा सूरिभ्य उपमं वरूथं स्वाभुवो जरणाम् अश्नवन्त ॥ ७ ०३० ०४
वोचेमेद् इन्द्रम् मघवानम् एनम् महो रायो राधसो यद् ददन् नः ।
यो अर्चतो ब्रह्मकृतिम् अविष्ठो यूयम् पात स्वस्तिभिः सदा नः ॥ ७ ०३० ०५

(५४७)

प्र व इन्द्राय मादनं हर्यश्वाय गायत ।
सखायः सोमपाव्ने ॥ ७ ०३१ ०१
शंसेद् उक्थं सुदानव उत द्युक्षं यथा नरः ।
चकृमा सत्यराधसे ॥ ७ ०३१ ०२
त्वं न इन्द्र वाजयुस् त्वं गव्युः शतक्रतो ।
त्वं हिरण्ययुर् वसो ॥ ७ ०३१ ०३
वयम् इन्द्र त्वायवोऽभि प्र णोनुमो वृषन् ।
विद्धी त्व् अ१स्य नो वसो ॥ ७ ०३१ ०४
मा नो निदे च वक्तवेऽर्यो रन्धीर् अराव्णे ।
त्वे अपि क्रतुर् मम ॥ ७ ०३१ ०५
त्वं वर्मासि सप्रथः पुरोयोधश् च वृत्रहन् ।
त्वया प्रति ब्रुवे युजा ॥ ७ ०३१ ०६
महाꣳ उतासि यस्य ते ऽनु स्वधावरी सहः ।
मन्नाते इन्द्र रोदसी ॥ ७ ०३१ ०७
तं त्वा मरुत्वती परि भुवद् वाणी सयावरी ।
नक्षमाणा सह द्युभिः ॥ ७ ०३१ ०८
ऊर्ध्वासस् त्वान्व् इन्दवो भुवन् दस्मम् उप द्यवि ।
सं ते नमन्त कृष्टयः ॥ ७ ०३१ ०९
प्र वो महे महिवृधे भरध्वम् प्रचेतसे प्र सुमतिं कृणुध्वम् ।
विशः पूर्वीः प्र चरा चर्षणिप्राः ॥ ७ ०३१ १०
उरुव्यचसे महिने सुवृक्तिम् इन्द्राय ब्रह्म जनयन्त विप्राः ।
तस्य व्रतानि न मिनन्ति धीराः ॥ ७ ०३१ ११
इन्द्रं वाणीर् अनुत्तमन्युम् एव सत्रा राजानं दधिरे सहध्यै ।
हर्यश्वाय बर्हया सम् आपीन् ॥ ७ ०३१ १२

(५४८)
मो षु त्वा वाघतश् चनारे अस्मन् नि रीरमन् ।

आरात्ताच् चित् सधमादं न आ गहीह वा सन्न् उप श्रुधि ॥ ७ ०३२ ०१
इमे हि ते ब्रह्मकृतः सुते सचा मधौ न मक्ष आसते ।
इन्द्रे कामं जरितारो वसूयवो रथे न पादम् आ दधुः ॥ ७ ०३२ ०२
रायस्कामो वज्रहस्तं सुदक्षिणम् पुत्रो न पितरं हुवे ॥ ७ ०३२ ०३
इम इन्द्राय सुन्विरे सोमासो दध्याशिरः ।
ताꣳ आ मदाय वज्रहस्त पीतये हरिभ्यां याह्य ओक आ ॥ ७ ०३२ ०४
श्रवच् छ्रुत्कर्ण ईयते वसूनां नू चिन् नो मर्धिषद् गिरः ।
सद्यश् चिद् यः सहस्राणि शता ददन् नकिर् दित्सन्तम् आ मिनत् ॥ ७ ०३२ ०५
स वीरो अप्रतिष्कुत इन्द्रेण शूशुवे नृभिः ।
यस् ते गभीरा सवनानि वृत्रहन् सुनोत्य् आ च धावति ॥ ७ ०३२ ०६
भवा वरूथम् मघवन् मघोनां यत् समजासि शर्धतः ।
वि त्वाहतस्य वेदनम् भजेमह्य आ दृणाशो भरा गयम् ॥ ७ ०३२ ०७
सुनोता सोमपावने सोमम् इन्द्राय वज्रिणे ।
पचता पक्तीर् अवसे कृणुध्वम् इत् पृणन्न् इत् पृणते मयः ॥ ७ ०३२ ०८
मा स्रेधत सोमिनो दक्षता महे कृणुध्वं राय आतुजे ।
तरणिर् इज् जयति क्षेति पुष्यति न देवासः कवत्नवे ॥ ७ ०३२ ०९
नकिः सुदासो रथम् पर्य् आस न रीरमत् ।
इन्द्रो यस्याविता यस्य मरुतो गमत् स गोमति व्रजे ॥ ७ ०३२ १०
गमद् वाजं वाजयन्न् इन्द्र मर्त्यो यस्य त्वम् अविता भुवः ।
अस्माकम् बोध्य् अविता रथानाम् अस्माकं शूर नृणाम् ॥ ७ ०३२ ११
उद् इन् न्व् अस्य रिच्यते ऽंशो धनं न जिग्युषः ।
य इन्द्रो हरिवान् न दभन्ति तं रिपो दक्ष दधाति सोमिनि ॥ ७ ०३२ १२
मन्त्रम् अखर्वं सुधितं सुपेशसं दधात यज्ञियेष्व् आ ।
पूर्वीश् चन प्रसितयस् तरन्ति तं य इन्द्रे कर्मणा भुवत् ॥ ७ ०३२ १३
कस् तम् इन्द्र त्वावसुम् आ मर्त्यो दधर्षति ।
श्रद्धा इत् ते मघवन् पार्ये दिवि वाजी वाजं सिषासति ॥ ७ ०३२ १४
मघोनः स्म वृत्रहत्येषु चोदय ये ददति प्रिया वसु ।
तव प्रणीती हर्यश्व सूरिभिर् विश्वा तरेम दुरिता ॥ ७ ०३२ १५

तवेद् इन्द्रावमं वसु त्वम् पुष्यसि मध्यमम् ।
सत्रा विश्वस्य परमस्य राजसि नकिष् ट्वा गोषु वृण्वते ॥ ७ ०३२ १६
त्वं विश्वस्य धनदा असि श्रुतो य ईम् भवन्त्य् आजयः ।
तवायं विश्वः पुरुहूत पार्थिवो ऽवस्युर् नाम भिक्षते ॥ ७ ०३२ १७
यद् इन्द्र यावतस् त्वम् एतावद् अहम् ईशीय ।
स्तोतारम् इद् दिधिषेय रदावसो न पापत्वाय रासीय ॥ ७ ०३२ १८
शिक्षेयम् इन् महयते दिवे-दिवे राय आ कुहचिद्विदे ।
नहि त्वद् अन्यन् मघवन् न आप्यं वस्यो अस्ति पिता चन ॥ ७ ०३२ १९
तरणिर् इत् सिषासति वाजम् पुरंध्या युजा ।
आ व इन्द्रम् पुरुहूतं नमे गिरा नेमिं तष्टेव सुद्रवम् ॥ ७ ०३२ २०
न दुष्टुती मर्त्यो विन्दते वसु न सेधन्तं रयिर् नशत् ।
सुशक्तिर् इन् मघवन् तुभ्यम् मावते देष्णं यत् पार्ये दिवि ॥ ७ ०३२ २१
अभि त्वा शूर नोनुमो ऽदुग्धा इव धेनवः ।
ईशानम् अस्य जगतः स्वर्दृशम् ईशानम् इन्द्र तस्थुषः ॥ ७ ०३२ २२
न त्वावाँ अन्यो दिव्यो न पार्थिवो न जातो न जनिष्यते ।
अश्वायन्तो मघवन्न् इन्द्र वाजिनो गव्यन्तस् त्वा हवामहे ॥ ७ ०३२ २३
अभी षतस् तद् आ भरेन्द्र ज्यायः कनीयसः ।
पुरुवसुर् हि मघवन् सनाद् असि भरे-भरे च हव्यः ॥ ७ ०३२ २४
परा णुदस्व मघवन्न् अमित्रान् सुवेदा नो वसू कृधि ।
अस्माकम् बोध्य् अविता महाधने भवा वृधः सखीनाम् ॥ ७ ०३२ २५
इन्द्र क्रतुं न आ भर पिता पुत्रेभ्यो यथा ।
शिक्षा णो अस्मिन् पुरुहूत यामनि जीवा ज्योतिर् अशीमहि ॥ ७ ०३२ २६
मा नो अज्ञाता वृजना दुराध्यो ३ माशिवासो अव क्रमुः ।
त्वया वयम् प्रवतः शश्वतीर् अपो ऽति शूर तरामसि ॥ ७ ०३२ २७

(५४९)

स्वित्यञ्चो मा दक्षिणतस्कपर्दा धियंजिन्वासो अभि हि प्रमन्दुः ।

उत्तिष्ठन् वोचे परि बर्हिषो नॄन् न मे दूराद् अवितवे वसिष्ठाः ॥ ७ ०३३ ०१
दूराद् इन्द्रम् अनयन्न् आ सुतेन तिरो वैशन्तम् अति पान्तम् उग्रम् ।
पाशद्युम्नस्य वायतस्य सोमात् सुताद् इन्द्रो ऽवृणीता वसिष्ठान् ॥ ७ ०३३ ०२
एवेन् नु कं सिन्धुम् एभिस् ततारेवेन् नु कम् भेदम् एभिर् जघान ।
एवेन् नु कं दाशराज्ञे सुदासम् प्रावद् इन्द्रो ब्रह्मणा वो वसिष्ठाः ॥ ७ ०३३ ०३
जुष्टी नरो ब्रह्मणा वः पितॄणाम् अक्षम् अव्ययं न किला रिषाथ ।
यच् छक्वरीषु बृहता रवेणेन्द्रे शुष्मम् अदधाता वसिष्ठाः ॥ ७ ०३३ ०४
उद् द्याम् इवेत् तृष्णजो नाथितासो ऽदीधयुर् दाशराज्ञे वृतासः ।
वसिष्ठस्य स्तुवत इन्द्रो अश्रोद् उरुं तृत्सुभ्यो अकृणोद् उलोकम् ॥ ७ ०३३ ०५
दण्डा इवेद् गोअजनास आसन् परिच्छिन्ना भरता अर्भकासः ।
अभवच् च पुरएता वसिष्ठ आद् इत् तृत्सूनां विशो अप्रथन्त ॥ ७ ०३३ ०६
त्रयः कृण्वन्ति भुवनेषु रेतस् तिस्रः प्रजा आर्या ज्योतिरग्राः ।
त्रयो घर्मास उषसं सचन्ते सर्वाँ इत् ताँ अनु विदुर् वसिष्ठाः ॥ ७ ०३३ ०७
सूर्यस्येव वक्षथो ज्योतिर् एषां समुद्रस्येव महिमा गभीरः ।
वातस्येव प्रजवो नान्येन स्तोमो वसिष्ठा अन्वेतवे वः ॥ ७ ०३३ ०८
त इन् निण्यं हृदयस्य प्रकेतैः सहस्रवल्शम् अभि सं चरन्ति ।
यमेन ततम् परिधिं वयन्तो ऽप्सरस उप सेदुर् वसिष्ठाः ॥ ७ ०३३ ०९
विद्युतो ज्योतिः परि संजिहानम् मित्रावरुणा यद् अपश्यतां त्वा ।
तत् ते जन्मोतैकं वसिष्ठागस्त्यो यत् त्वा विश आजभार ॥ ७ ०३३ १०
उतासि मैत्रावरुणो वसिष्ठोर्वश्या ब्रह्मन् मनसो ऽधि जातः ।
द्रप्सं स्कन्नम् ब्रह्मणा दैव्येन विश्वे देवाः पुष्करे त्वाददन्त ॥ ७ ०३३ ११
स प्रकेत उभयस्य प्रविद्वान् सहस्रदान उत वा सदानः ।
यमेन ततम् परिधिं वयिष्यन्न् अप्सरसः परि जज्ञे वसिष्ठः ॥ ७ ०३३ १२
सत्रे ह जाताव् इषिता नमोभिः कुम्भे रेतः सिषिचतुः समानम् ।
ततो ह मान उद् इयाय मध्यात् ततो जातम् ऋषिम् आहुर् वसिष्ठम् ॥ ७ ०३३ १३
उक्थभृतं सामभृतम् बिभर्ति ग्रावाणम् बिभ्रत् प्र वदात्य् अग्रे ।
उपैनम् आध्वं सुमनस्यमाना आ वो गच्छाति प्रतृदो वसिष्ठः ॥ ७ ०३३ १४

(५५०)

प्र शुक्रैतु देवी मनीषा अस्मत् सुतष्टो रथो न वाजी ॥ ७ ०३४ ०१
विदुः पृथिव्या दिवो जनित्रं शृण्वन्त्य् आपो अध क्षरन्तीः ॥ ७ ०३४ ०२
आपश् चिद् अस्मै पिन्वन्त पृथ्वीर् वृत्रेषु शूरा मंसन्त उग्राः ॥ ७ ०३४ ०३
आ धूर्ष्व् अस्मै दधाताश्वान् इन्द्रो न वज्री हिरण्यबाहुः ॥ ७ ०३४ ०४
अभि प्र स्थाताहेव यज्ञं यातेव पत्मन् त्मना हिनोत ॥ ७ ०३४ ०५
त्मना समत्सु हिनोत यज्ञं दधात केतुं जनाय वीरम् ॥ ७ ०३४ ०६
उद् अस्य शुष्माद् भानुर् नार्त बिभर्ति भारम् पृथिवी न भूम ॥ ७ ०३४ ०७
हूयामि देवाꣳ अयातुर् अग्ने साधन्न् ऋतेन धियं दधामि ॥ ७ ०३४ ०८
अभि वो देवीं धियं दधिध्वम् प्र वो देवत्रा वाचं कृणुध्वम् ॥ ७ ०३४ ०९
आ चष्ट आसाम् पाथो नदीनां वरुण उग्रः सहस्रचक्षाः ॥ ७ ०३४ १०
राजा राष्ट्रानाम् पेशो नदीनाम् अनुत्तम् अस्मै क्षत्रं विश्वायु ॥ ७ ०३४ ११
अविष्टो अस्मान् विश्वासु विक्ष्व् अद्यु कृणोत शंस निनित्सोः ॥ ७ ०३४ १२
व्य् एतु दिद्युद् द्विषाम् अशेवा युयोत विष्वग् रपस् तनूनाम् ॥ ७ ०३४ १३
अवीन् नो अग्निर् हव्यान् नमोभिः प्रेष्ठो अस्मा अधायि स्तोमः ॥ ७ ०३४ १४
सजूर् देवेभिर् अपां नपातं सखायं कृध्वं शिवो नो अस्तु ॥ ७ ०३४ १५
अब्जाम् उक्थैर् अहिं गृणीषे बुध्ने नदीनां रजस्सु षीदन् ॥ ७ ०३४ १६
मा नो ऽहिर् बुध्न्यो रिषे धान् मा यज्ञो अस्य स्रिधद् ऋतायोः ॥ ७ ०३४ १७
उत न एषु नृषु श्रवो धुः प्र राये यन्तु शर्धन्तो अर्यः ॥ ७ ०३४ १८
तपन्ति शत्रुं स्व १ र् ण भूमा महासेनासो अमेभिर् एषाम् ॥ ७ ०३४ १९
आ यन् नः पत्नीर् गमन्त्य् अच्छा त्वष्टा सुपाणिर् दधातु वीरान् ॥ ७ ०३४ २०
प्रति न स्तोमं त्वष्टा जुषेत स्याद् अस्मे अरमतिर् वसूयुः ॥ ७ ०३४ २१
ता नो रासन् रातिषाचो वसून्य् आ रोदसी वरुणानी शृणोतु ।
वरूत्रीभिः सुशरणो नो अस्तु त्वष्टा सुदत्रो वि दधातु रायः ॥ ७ ०३४ २२
तन् नो रायः पर्वतास् तन् न आपस् तद् रातिषाच ओषधीर् उत द्यौः ।
वनस्पतिभिः पृथिवी सजोषा उभे रोदसी परि पासतो नः ॥ ७ ०३४ २३
अनु तद् उर्वी रोदसी जिहाताम् अनु द्युक्षो वरुण इन्द्रसखा ।
अनु विश्वे मरुतो ये सहासो रायः स्याम धरुणं धियध्यै ॥ ७ ०३४ २४

तन् न इन्द्रो वरुणो मित्रो अग्निर् आप ओषधीर् वनिनो जुषन्त ।
शर्मन् स्याम मरुताम् उपस्थे यूयम् पात स्वस्तिभिः सदा नः ॥ ७ ०३४ २५

(५५१)

शं न इन्द्राग्नी भवताम् अवोभिः शं न इन्द्रावरुणा रातहव्या ।
शम् इन्द्रासोमा सुविताय शं योः शं न इन्द्रापूषणा वाजसातौ ॥ ७ ०३५ ०१
शं नो भगः शम् उ नः शंसो अस्तु शं नः पुरंधिः शम् उ सन्तु रायः ।
शं नः सत्यस्य सुयमस्य शंसः शं नो अर्यमा पुरुजातो अस्तु ॥ ७ ०३५ ०२
शं नो धाता शम् उ धर्ता नो अस्तु शं न उरूची भवतु स्वधाभिः ।
शं रोदसी बृहती शं नो अद्रिः शं नो देवानां सुहवानि सन्तु ॥ ७ ०३५ ०३
शं नो अग्निर् ज्योतिरनीको अस्तु शं नो मित्रावरुणाव् अश्विना शम् ।
शं नः सुकृतां सुकृतानि सन्तु शं न इषिरो अभि वातु वातः ॥ ७ ०३५ ०४
शं नो द्यावापृथिवी पूर्वहूतौ शम् अन्तरिक्षं दृशये नो अस्तु ।
शं न ओषधीर् वनिनो भवन्तु शं नो रजसस् पतिर् अस्तु जिष्णुः ॥ ७ ०३५ ०५
शं न इन्द्रो वसुभिर् देवो अस्तु शम् आदित्येभिर् वरुणः सुशंसः ।
शं नो रुद्रो रुद्रेभिर् जलाषः शं नस् त्वष्टा ग्नाभिर् इह शृणोतु ॥ ७ ०३५ ०६
शं नः सोमो भवतु ब्रह्म शं नः शं नो ग्रावाणः शम् उ सन्तु यज्ञाः ।
शं नः स्वरूणाम् मितयो भवन्तु शं नः प्रस्व १ : शम् व् अस्तु वेदिः ॥ ७ ०३५ ०७
शं नः सूर्य उरुचक्षा उद् एतु शं नश् चतस्रः प्रदिशो भवन्तु ।
शं नः पर्वता ध्रुवयो भवन्तु शं नः सिन्धवः शम् उ सन्त्व् आपः ॥ ७ ०३५ ०८
शं नो अदितिर् भवतु व्रतेभिः शं नो भवन्तु मरुतः स्वर्काः ।
शं नो विष्णुः शम् उ पूषा नो अस्तु शं नो भवित्रं शम् व् अस्तु वायुः ॥ ७ ०३५ ०९
शं नो देवः सविता त्रायमाणः शं नो भवन्तूषसो विभातीः ।
शं नः पर्जन्यो भवतु प्रजाभ्यः शं नः क्षेत्रस्य पतिर् अस्तु शम्भुः ॥ ७ ०३५ १०
शं नो देवा विश्वदेवा भवन्तु शं सरस्वती सह धीभिर् अस्तु ।
शम् अभिषाचः शम् उ रातिषाचः शं नो दिव्याः पार्थिवाः शं नो अप्याः ॥ ७ ०३५ ११

शं नः॑ स॒त्यस्य॑ पत॑यो भवन्तु शं नो॒ अर्व॑न्तः॒ शम् उ॑ सन्तु गावः॑ ।
शं न॑ ऋ॒भवः॑ सुकृतः॑ सुहस्ताः॒ शं नो॑ भवन्तु पि॒तरो॑ हवे॒षु ॥ ७ ०३५ १२
शं नो॑ अ॒ज एक॑पाद् देवो अस्तु॒ शं नो ऽहि॑र् बु॒ध्य॑१ः शं स॑मु॒द्रः ।
शं नो॑ अ॒पां नपा॑त् पे॒रुर् अ॑स्तु॒ शं नः॒ पृश्नि॑र् भवतु देवगो॒पा ॥ ७ ०३५ १३
आ॒दि॒त्या रु॒द्रा वस॑वो जुषन्ते॒दम् ब्रह्म॑ क्रि॒यमा॑णं नवी॒यः ।
शृ॒ण्व॒न्तु नो॒ दिव्याः॑ पार्थि॒वासो॑ गोजा॒ता उ॒त ये य॒ज्ञिया॑सः ॥ ७ ०३५ १४
ये दे॒वाना॑ य॒ज्ञिया॑ य॒ज्ञिया॑नाम् मनो॒र् यज॑त्रा अ॒मृता॑ ऋ॒तज्ञाः ।
ते नो॑ रासन्ताम् उरुगा॒यम् अ॒द्य यू॒यम् पा॑त स्व॒स्तिभि॒ः सदा॑ नः ॥ ७ ०३५ १५

(५५२)

प्र ब्रह्मै॑तु सद॑नाद् ऋ॒तस्य॒ वि र॒श्मिभि॑ः ससृजे॒ सूर्यो॑ गाः ।
वि सानु॑ना पृथि॒वी स॑स्र उ॒र्वी पृथु॒ प्रती॑कम् अध्य् ए॒धे॑ अ॒ग्निः ॥ ७ ०३६ ०१
इ॒मां वा॑म् मित्रावरुणा सुवृ॒क्तिम् इ॒षं न कृ॑ण्वे असुरा॒ नवी॑यः ।
इ॒नो वा॑म् अ॒न्यः प॑दवीर् अदब्धो॒ जनं॑ च मि॒त्रो यत॑ति ब्रुवा॒णः ॥ ७ ०३६ ०२
आ वात॑स्य ध्र॒जतो॑ रन्त इ॒त्या अपी॑पयन्त धे॒नवो॒ न सूदाः॑ ।
म॒हो दि॒वः सद॑ने जाय॒मानो ऽचिक्रदद् वृ॒षभः सस्मि॒न्न् ऊध॑न् ॥ ७ ०३६ ०३
गि॒रा य एता यु॑नज॒द् धरी॑ त इन्द्र॒ प्रिया सु॒रथा॑ शूर धा॒यू ।
प्र यो म॒न्युं रिरि॑क्षतो मि॒नात्य् आ सु॒क्रतु॑म् अ॒र्यमणं॑ ववृत्याम् ॥ ७ ०३६ ०४
यज॑न्ते अस्य स॒ख्यं वय॑श् च नम॒स्विनः॒ स्व ऋ॒तस्य॒ धाम॑न् ।
वि पृक्षो॑ बाबधे नृ॒भि स्तवा॑न इ॒दं नमो॑ रु॒द्राय॒ प्रेष्ठ॑म् ॥ ७ ०३६ ०५
आ यत् सा॒कं य॒शसो॑ वावशा॒नाः सर॑स्वती स॒प्तथी॒ सिन्धु॑माता ।
याः सु॒ष्वय॑न्त सुदुघाः॑ सुधा॒रा अ॒भि स्वेन॒ पय॑सा॒ पीप्या॑नाः ॥ ७ ०३६ ०६
उ॒त त्ये नो॑ मरुतो॑ मन्दसा॒ना धिय॑ं तो॒कं च॑ वा॒जिनो॑ ऽवन्तु ।
मा नः॒ परि॑ ख्य॒द् अक्ष॑रा चरन्त्य् अवी॑वृधन् युज्यं ते र॒यिं नः॑ ॥ ७ ०३६ ०७
प्र वो॑ म॒हीम् अर॑मतिं कृणुध्वम् प्र पू॒षण॑ं विद॒थ्य॑१ं न वी॒रम् ।
भग॑ं धि॒यो ऽवि॒तार॑ं नो अस्याः सा॒तौ वाज॑ं रा॒तिषा॑चम् पुर॒ंधिम् ॥ ७ ०३६ ०८
अच्छा॒यं वो॑ मरुतः॒ श्लोक॑ एत्व् अच्छा॒ विष्णु॑ं निषि॒क्तपाम् अवो॑भिः ।

उत प्रजायै गृणते वयो धुर् यूयम् पात स्वस्तिभिः सदा नः ॥ ७ ०३६ ०९

(५५३)

आ वो वाहिष्ठो वहतु स्तवध्यै रथो वाजा ऋभुक्षणो अमृक्तः ।
अभि त्रिपृष्ठैः सवनेषु सोमैर् मदे सुशिप्रा महभिः पृणध्वम् ॥ ७ ०३७ ०१
यूयं ह रत्नम् मघवत्सु धत्थ स्वर्दृशो ऋभुक्षणो अमृक्तम् ।
सं यज्ञेषु स्वधावन्तः पिबध्वं वि नो राधांसि मतिभिर् दयध्वम् ॥ ७ ०३७ ०२
उवोचिथ हि मघवन् देष्णम् महो अर्भस्य वसुनो विभागे ।
उभा ते पूर्णा वसुना गभस्ती न सूनृता नि यमते वसव्या ॥ ७ ०३७ ०३
त्वम् इन्द्र स्वयशा ऋभुक्षा वाजो न साधुर् अस्तम् एष्य् ऋक्वा ।
वयं नु ते दाश्वांसः स्याम ब्रह्म कृण्वन्तो हरिवो वसिष्ठाः ॥ ७ ०३७ ०४
सनितासि प्रवतो दाशुषे चिद् याभिर् विवेषो हर्यश्व धीभिः ।
ववन्मा नु ते युज्याभिर् ऊती कदा न इन्द्र राय आ दशस्येः ॥ ७ ०३७ ०५
वासयसीव वेधसस् त्वं नः कदा न इन्द्र वचसो बुबोधः ।
अस्तं तात्या धिया रयिं सुवीरम् पृक्षो नो अर्वा न्य् उहीत वाजी ॥ ७ ०३७ ०६
अभि यं देवी निर्तिश् चिद् ईशे नक्षन्त इन्द्रं शरदः सुपृक्षः ।
उप त्रिबन्धुर् जरदष्टिम् एत्य् अस्ववेशं यं कृणवन्त मर्ताः ॥ ७ ०३७ ०७
आ नो राधांसि सवित स्तवध्या आ रायो यन्तु पर्वतस्य रातौ ।
सदा नो दिव्यः पायुः सिषक्तु यूयम् पात स्वस्तिभिः सदा नः ॥ ७ ०३७ ०८

(५५४)

उद् उ ष्य देवः सविता ययाम हिरण्ययीम् अमतिं याम् अशिश्रेत् ।
नूनम् भगो हव्यो मानुषेभिर् वि यो रत्ना पुरूवसुर् दधाति ॥ ७ ०३८ ०१
उद् उ तिष्ठ सवितः श्रुध्य् अ ऽ स्य हिरण्यपाणे प्रभृताव् ऋतस्य ।
व्य् उ ऽ र्वीम् पृथ्वीम् अमतिं सृजान आ नृभ्यो मर्तभोजनं सुवानः ॥ ७ ०३८ ०२
अपि ष्टुतः सविता देवो अस्तु यम् आ चिद् विश्वे वसवो गृणन्ति ।
स न स्तोमान् नमस्य ऽ श् चनो धाद् विश्वेभिः पातु पायुभिर् नि सूरीन् ॥ ७ ०३८ ०३

अभि यं देव्य् अदितिर् गृणाति सवं देवस्य सवितुर् जुषाणा ।
अभि सम्राजो वरुणो गृणन्त्य् अभि मित्रासो अर्यमा सजोषाः ॥ ७ ०३८ ०४
अभि ये मिथो वनुषः सपन्ते रातिं दिवो रातिषाचः पृथिव्याः ।
अहिर् बुध्न्य उत नः शृणोतु वरूत्र्य् एकधेनुभिर् नि पातु ॥ ७ ०३८ ०५
अनु तन् नो जास्पतिर् मंसीष्ट रत्नं देवस्य सवितुर् इयानः ।
भगम् उग्रो ऽवसे जोहवीति भगम् अनुग्रो अध याति रत्नम् ॥ ७ ०३८ ०६
शं नो भवन्तु वाजिनो हवेषु देवताता मितद्रवः स्वर्काः ।
जम्भयन्तो ऽहिं वृकं रक्षांसि सनेम्य् अस्मद् युयवन्न् अमीवाः ॥ ७ ०३८ ०७
वाजे-वाजे ऽवत वाजिनो नो धनेषु विप्रा अमृता ऋतज्ञाः ।
अस्य मध्वः पिबत मादयध्वं तृप्ता यात पथिभिर् देवयानैः ॥ ७ ०३८ ०८

(५५५)

ऊर्ध्वो अग्निः सुमतिं वस्वो अश्रेत् प्रतीची जूर्णिर् देवतातिम् एति ।
भेजाते अद्री रथ्येव पन्थाम् ऋतं होता न इषितो यजाति ॥ ७ ०३९ ०१
प्र वावृजे सुप्रया बर्हिर् एषाम् आ विश्पतीव बीरिट इयाते ।
विशाम् अक्तोर् उषसः पूर्वहूतौ वायुः पूषा स्वस्तये नियुत्वान् ॥ ७ ०३९ ०२
ज्मया अत्र वसवो रन्त देवा उराव् अन्तरिक्षे मर्जयन्त शुभ्राः ।
अर्वाक् पथ उरुज्रयः कृणुध्वं श्रोता दूतस्य जग्मुषो नो अस्य ॥ ७ ०३९ ०३
ते हि यज्ञेषु यज्ञियास ऊमाः सधस्थं विश्वे अभि सन्ति देवाः ।
ताꣳ अध्वर उशतो यक्ष्य् अग्ने श्रुष्टी भगं नासत्या पुरंधिम् ॥ ७ ०३९ ०४
आग्ने गिरो दिव आ पृथिव्या मित्रं वह वरुणम् इन्द्रम् अग्निम् ।
आर्यमणम् अदितिं विष्णुम् एषां सरस्वती मरुतो मादयन्ताम् ॥ ७ ०३९ ०५
ररे हव्यम् मतिभिर् यज्ञियानां नक्षत् कामम् मर्त्यानाम् असिन्वन् ।
धाता रयिम् अविदस्यं सदासां सक्षीमहि युज्येभिर् नु देवैः ॥ ७ ०३९ ०६
नू रोदसी अभिष्टुते वसिष्ठैर् ऋतावानो वरुणो मित्रो अग्निः ।
यच्छन्तु चन्द्रा उपमं नो अर्कं यूयम् पात स्वस्तिभिः सदा नः ॥ ७ ०३९ ०७

(५५६)

ओ श्रुष्टिर् विदथ्या ३ सम् एतु प्रति स्तोमं दधीमहि तुराणाम् ।
यद् अद्य देवः सविता सुवाति स्यामास्य रत्निनो विभागे ॥ ७ ०४० ०१
मित्रस् तन् नो वरुणो रोदसी च द्युभक्तम् इन्द्रो अर्यमा ददातु ।
दिदेष्टु देव्य् अदितीरेक्णो वायुश् च यन् नियुवैते भगश् च ॥ ७ ०४० ०२
सेद् उग्रो अस्तु मरुतः स शुष्मी यम् मर्त्यम् पृषदश्वा अवाथ ।
उतेम् अग्निः सरस्वती जुनन्ति न तस्य रायः पर्येतास्ति ॥ ७ ०४० ०३
अयं हि नेता वरुण ऋतस्य मित्रो राजानो अर्यमापो धुः ।
सुहवा देव्य् अदितिर् अनर्वा ते नो अंहो अति पर्षन्न् अरिष्टान् ॥ ७ ०४० ०४
अस्य देवस्य मीळ्हुषो वया विष्णोर् एषस्य प्रभृथे हविर्भिः ।
विदे हि रुद्रो रुद्रियम् महित्वं यासिष्टं वर्तिर् अश्विनाव् इरावत् ॥ ७ ०४० ०५
मात्र पूषन्न् आघृण इरस्यो वरूत्री यद् रातिषाचश् च रासन् ।
मयोभुवो नो अर्वन्तो नि पान्तु वृष्टिम् परिज्मा वातो ददातु ॥ ७ ०४० ०६
नू रोदसी अभिष्टुते वसिष्ठैर् ऋतावानो वरुणो मित्रो अग्निः ।
यच्छन्तु चन्द्रा उपमं नो अर्कं यूयम् पात स्वस्तिभिः सदा नः ॥ ७ ०४० ०७

(५५७)

प्रातर् अग्निम् प्रातर् इन्द्रं हवामहे प्रातर् मित्रावरुणा प्रातर् अश्विना ।
प्रातर् भगम् पूषणम् ब्रह्मणस् पतिम् प्रातः सोमम् उत रुद्रं हुवेम ॥ ७ ०४१ ०१
प्रातर्जितम् भगम् उग्रं हुवेम वयम् पुत्रम् अदितेर् यो विधर्ता ।
आध्रश् चिद् यम् मन्यमानस् तुरश् चिद् राजा चिद् यम् भगम् भक्षीत्य् आह ॥ ७ ०४१ ०२
भग प्रणेतर् भग सत्यराधो भगेमां धियम् उद् अवा ददन् नः ।
भग प्र णो जनय गोभिर् अश्वैर् भग प्र नृभिर् नृवन्तः स्याम ॥ ७ ०४१ ०३
उतेदानीम् भगवन्तः स्यामोत प्रपित्व उत मध्ये अह्नाम् ।
उतोदिता मघवन् सूर्यस्य वयं देवानां सुमतौ स्याम ॥ ७ ०४१ ०४
भग एव भगवाꣳ अस्तु देवास् तेन वयम् भगवन्तः स्याम ।

तं त्वा॑ भग॒ सर्व॒ इज् जो॑हवीति॒ स नो॑ भग पुरए॒ता भ॑वे॒ह ॥ ७ ०४१ ०५
सम् अ॑ध्व॒रायो॒षसो॑ नमन्त दधि॒क्रावे॑व॒ शुच॑ये प॒दाय॑ ।
अ॒र्वा॒ची॒नं व॑सु॒विद॒म् भगं॑ नो॒ रथ॑म् इ॒वाश्वा॑ वा॒जिन॒ आ व॑हन्तु ॥ ७ ०४१ ०६
अश्वा॑वती॒र् गोम॑तीर् न उ॒षासो॑ वी॒रव॑ती॒ः सद॑म् उच्छन्तु भ॒द्राः ।
घृ॒तं दुहा॑ना वि॒श्वत॒ः प्रपी॑ता यू॒यम् पा॑त स्व॒स्तिभि॒ः सदा॑ नः ॥ ७ ०४१ ०७

(५५८)
प्र ब्र॒ह्माणो॒ अङ्गि॑रसो नक्षन्त॒ प्र क्र॑न्द॒नुर् न॑भ॒न्यस्य वेतु ।
प्र धे॒नव॑ उद॒प्रुतो॑ नवन्त यु॒ज्याता॒म् अद्री॑ अध्व॒रस्य॒ पेशः॑ ॥ ७ ०४२ ०१
सु॒गस् ते॑ अग्ने॒ सन॑वित्तो॒ अध्वा॑ यु॒क्ष्वा सु॒ते ह॒रितो॑ रो॒हित॑श् च ।
ये वा॒ सद्म॑न्न् अरु॒षा वी॑र॒वाहो॑ हु॒वे दे॒वानां॒ जनि॑मानि स॒त्तः ॥ ७ ०४२ ०२
सम् उ॑ वो य॒ज्ञम् म॑हय॒न् नमो॑भि॒ः प्र होता॑ म॒न्द्रो रि॑रिच उपा॒के ।
यज॑स्व॒ सु पु॑र्वणीक दे॒वान् आ य॒ज्ञिया॑म् अ॒रम॑तिं ववृत्याः ॥ ७ ०४२ ०३
य॒दा वी॒रस्य॑ रे॒वतो॑ दुरो॒णे स्यो॑न॒शीर् अति॑थिर् आ॒चिके॑तत् ।
सुप्री॑तो अ॒ग्निः सुधि॑तो॒ दम॒ आ स वि॒शे दा॑ति॒ वार्य॒म् इय॑त्यै ॥ ७ ०४२ ०४
इ॒मं नो॑ अग्ने अध्व॒रं जु॑षस्व म॒रुत्स्व् इन्द्रे॑ य॒शसं॑ कृधी नः ।
आ नक्ता॑ ब॒र्हिः स॑दताम् उ॒षासो॒शन्ता॑ मि॒त्रावरु॑णा यजे॒ह ॥ ७ ०४२ ०५
ए॒वाग्निं स॑ह॒स्य १॒॑ वसि॑ष्ठो रा॒यस्का॑मो वि॒श्वप्स्न्य॑स्य स्तौत् ।
इषं॑ र॒यिम् प॑प्रथ॒द् वाज॑म् अ॒स्मे यू॒यम् पा॑त स्व॒स्तिभि॒ः सदा॑ नः ॥ ७ ०४२ ०६

(५५९)
प्र वो॑ य॒ज्ञेषु॑ देव॒यन्तो॑ अर्च॒न् द्यावा॒ नमो॑भिः पृथि॒वी इ॒षध्यै॑ ।
येषा॒म् ब्रह्मा॒ण्य् अस॑मानि॒ विप्रा॒ विष्व॑ग् वि॒यन्ति॑ व॒निनो॒ न शाखाः॑ ॥ ७ ०४३ ०१
प्र य॒ज्ञ ए॑तु॒ हेत्वो॒ न सप्ति॒र् उद् य॑च्छध्वं॒ सम॑नसो घृ॒ताचीः॑ ।
स्तृ॒णी॒त ब॒र्हिर् अ॑ध्व॒राय॑ सा॒धूर्ध्वा शो॒चींषि॑ देव॒यून्य् अ॑स्थुः ॥ ७ ०४३ ०२
आ पु॒त्रासो॒ न मा॒तरं॒ विभृ॑त्रा॒ः सानौ॑ दे॒वासो॑ ब॒र्हिषः॑ सदन्तु ।

आ विश्वाची विदथ्याम् अनक्तव् अग्ने मा नो देवताता मृधस् कः ॥ ७ ०४३ ०३
ते सीषपन्त जोषम् आ यजत्रा ऋतस्य धाराः सुदुघा दुहानाः ।
ज्येष्ठं वो अद्य मह आ वसूनाम् आ गन्तन समनसो यति ष्ठ ॥ ७ ०४३ ०४
एवा नो अग्ने विक्ष्व् आ दशस्य त्वया वयं सहसावन्न् आस्काः ।
राया युजा संधमादो अरिष्टा यूयम् पात स्वस्तिभिः सदा नः ॥ ७ ०४३ ०५

(५६०)
दधिक्रां वः प्रथमम् अश्विनोषसम् अग्निं समिद्धम् भगम् ऊतये हुवे ।
इन्द्रं विष्णुम् पूषणम् ब्रह्मणस् पतिम् आदित्यान् द्यावापृथिवी अपः स्वः ॥ ७ ०४४ ०१
दधिक्राम् उ नमसा बोधयन्त उदीराणा यज्ञम् उपप्रयन्तः ।
इळां देवीम् बर्हिषि सादयन्तो ऽश्विना विप्रा सुहवा हुवेम ॥ ७ ०४४ ०२
दधिक्रावाणम् बुबुधानो अग्निम् उप ब्रुव उषसं सूर्यं गाम् ।
ब्रध्नम् माश्वतोर् वरुणस्य बभ्रुं ते विश्वास्मद् दुरिता यावयन्तु ॥ ७ ०४४ ०३
दधिक्रावा प्रथमो वाज्य् अर्वाग्रे रथानाम् भवति प्रजानन् ।
संविदान उषसा सूर्येणादित्येभिर् वसुभिर् अङ्गिरोभिः ॥ ७ ०४४ ०४
आ नो दधिक्राः पथ्याम् अनक्तव् ऋतस्य पन्थाम् अन्वेतवा उ ।
शृणोतु नो दैव्यं शर्धो अग्निः शृण्वन्तु विश्वे महिषा अमूराः ॥ ७ ०४४ ०५

(५६१)
आ देवो यातु सविता सुरत्नो ऽन्तरिक्षप्रा वहमानो अश्वैः ।
हस्ते दधानो नर्या पुरूणि निवेशयञ् च प्रसुवञ् च भूम ॥ ७ ०४५ ०१
उद् अस्य बाहू शिथिरा बृहन्ता हिरण्यया दिवो अन्ताँ अनष्टाम् ।
नूनं सो अस्य महिमा पनिष्ट सूरश् चिद् अस्मा अनु दाद् अपस्याम् ॥ ७ ०४५ ०२
स घा नो देवः सविता सहावा साविषद् वसुपतिर् वसूनि ।
विश्रयमाणो अमतिम् उरूचीम् मर्तभोजनम् अध रासते नः ॥ ७ ०४५ ०३
इमा गिरः सवितारं सुजिह्वम् पूर्णगभस्तिम् ईळते सुपाणिम् ।

चित्रं वयो बृहद् अस्मे दधातु यूयम् पात स्वस्तिभिः सदा नः ॥ ७ ०४५ ०४

(५६२)

इमा रुद्राय स्थिरधन्वने गिरः क्षिप्रेषवे देवाय स्वधावे ।
अषाळ्हाय सहमानाय वेधसे तिग्मायुधाय भरता शृणोतु नः ॥ ७ ०४६ ०१
स हि क्षयेण क्षम्यस्य जन्मनः साम्राज्येन दिव्यस्य चेतति ।
अवन्न् अवन्तीर् उप नो दुरश् चरानमीवो रुद्र जासु नो भव ॥ ७ ०४६ ०२
या ते दिद्युद् अवसृष्टा दिवस् परि क्षमया चरति परि सा वृणक्तु नः ।
सहस्रं ते स्वपिवात भेषजा मा नस् तोकेषु तनयेषु रीरिषः ॥ ७ ०४६ ०३
मा नो वधी रुद्र मा परा दा मा ते भूम प्रसितौ हीळितस्य ।
आ नो भज बर्हिषि जीवशंसे यूयम् पात स्वस्तिभिः सदा नः ॥ ७ ०४६ ०४

(५६३)

आपो यं वः प्रथमं देवयन्त इन्द्रपानम् ऊर्मिम् अकृण्वतेळः ।
तं वो वयं शुचिम् अरिप्रम् अद्य घृतप्रुषम् मधुमन्तं वनेम ॥ ७ ०४७ ०१
तम् ऊर्मिम् आपो मधुमत्तमं वो ऽपां नपाद् अवत्व् आशुहेमा ।
यस्मिन्न् इन्द्रो वसुभिर् मादयाति तम् अश्याम देवयन्तो वो अद्य ॥ ७ ०४७ ०२
शतपवित्राः स्वधया मदन्तीर् देवीर् देवानाम् अपि यन्ति पाथः ।
ता इन्द्रस्य न मिनन्ति व्रतानि सिन्धुभ्यो हव्यं घृतवज् जुहोत ॥ ७ ०४७ ०३
याः सूर्यो रश्मिभिर् आततान याभ्य इन्द्रो अरदद् गातुम् ऊर्मिम् ।
ते सिन्धवो वरिवो धातना नो यूयम् पात स्वस्तिभिः सदा नः ॥ ७ ०४७ ०४

(५६४)

ऋभुक्षणो वाजा मादयध्वम् अस्मे नरो मघवानः सुतस्य ।
आ वो ऽर्वाचः क्रतवो न यातां विभ्वो रथं नयँ वर्तयन्तु ॥ ७ ०४८ ०१
ऋभुर् ऋभुभिर् अभि वः स्याम विभ्वो विभुभिः शवसा शवांसि ।

वाजो॑ अ॒स्माꣳ अ॑वतु वाज॒सात॒व् इन्द्रे॑ण यु॒जा त॑रुषेम वृ॒त्रम् ॥ ७ ०४८ ०२
ते चि॒द् धि पूर्वी॑र् अ॒भि सन्ति॑ शा॒सा विश्वा॑ꣳ अ॒र्य उ॑प॒रता॑ति वन्वन् ।
इन्द्रो॒ विभ्वा॑ꣳ ऋ॒भुक्षा॒ वाजो॑ अ॒र्यः शत्रो॑र् मि॒थत्या॑ कृ॒णव॒न् वि नृ॒म्णम् ॥ ७ ०४८ ०३
नू दे॑वासो॒ वरि॑वः कर्तना नो भू॒त नो॒ विश्वे॑ ऽवसे स॒जोषाः॑ ।
सम् अ॒स्मे इष॑ं वस॒वो द॒दीर॒न् युयम् पा॑त स्व॒स्तिभि॒: सदा॑ नः ॥ ७ ०४८ ०४

(५६५)

स॒मु॒द्रज्ये॑ष्ठाः सलि॒लस्य॒ मध्या॑त् पु॒ना॒ना य॒न्त्य् अनि॑विशमानाः ।
इन्द्रो॒ या व॒ज्री वृ॑ष॒भो र॒राद॒ ता आपो॑ दे॒वीर् इ॒ह माम् अ॑वन्तु ॥ ७ ०४९ ०१
या आपो॑ दि॒व्या उ॒त वा॒ स्र॒व॒न्ति॒ ख॒नि॒त्रिमा॒ उ॒त वा॒ याः स्व॑यं॒जाः ।
स॒मु॒द्रार्था॒ याः शु॒चय॒: पा॒वका॒स् ता आपो॑ दे॒वीर् इ॒ह माम् अ॑वन्तु ॥ ७ ०४९ ०२
यासां॑ राजा॒ व॒रु॒णो॒ याति॒ मध्ये॑ स॒त्यानृ॑ते अ॒व॒प॒श्यञ् ज॒नाना॑म् ।
म॒धु॒श्चुत॒: शु॒चय॒यो॒ याः पा॒व॒कास् ता आपो॑ दे॒वीर् इ॒ह माम् अ॑वन्तु ॥ ७ ०४९ ०३
यासु॒ राजा॒ व॒रु॒णो॒ यासु॒ सोमो॒ विश्वे॑ दे॒वा यासू॒र्जम् म॑दन्ति ।
वै॒श्वा॒न॒रो यास्व् अ॒ग्निः प्र॒वि॒ष्टस् ता आपो॑ दे॒वीर् इ॒ह माम् अ॑वन्तु ॥ ७ ०४९ ०४

(५६६)

आ माम् मि॑त्रावरुणेह॒ र॑क्षतं कु॒लाय॑यद् वि॒श्वय॒न् मा न॒ आ ग॑न् ।
अ॒ज॒कावं॑ दु॒र्दृ॒शी॑कं ति॒रो द॑धे॒ मा माम् प॒द्येन॑ रप॑सा विदत् त्स॒रुः॑ ॥ ७ ०५० ०१
यद् वि॒जाम॒न् पर॑ुषि॒ वन्द॑नम् भु॒व॑द् अष्ठी॒वन्तौ॑ परि॑ कु॒ल्फौ च॒ देह॑त् ।
अ॒ग्निष् टच् छो॒च॒न्न् अप॑ बाधताम् इ॒तो मा माम् प॒द्येन॑ रप॑सा विदत् त्स॒रुः॑ ॥ ७ ०५० ०२
यच् छ॒ल्म॒लौ भव॑ति॒ यन् न॒दीषु॒ यद् ओष॑धीभ्य॒: परि॒ जाय॑ते वि॒षम् ।
विश्वे॑ दे॒वा निर् इ॒तस् तत् सु॑वन्तु मा माम् प॒द्येन॑ रप॑सा विदत् त्स॒रुः॑ ॥ ७ ०५० ०३
याः प्र॒वतो॑ नि॒वत॑ उ॒द्वत॑ उदन्वतीर् अनुदकाश् च याः ।
ता अ॒स्म॒भ्य॒म् पय॑सा पिन्व॒माना॒: शि॒वा दे॒वीर् अ॑शिपदा भ॑वन्तु सर्वा॑ न॒द्यो॒ अशि॒मि॒दा

भवन्तु ॥ ७ ०५० ०४

(५६७)

आदित्यानाम् अवसा नूतनेन सक्षीमहि शर्मणा शंतमेन ।
अनागास्त्वे अदितित्वे तुरास इमं यज्ञं दधतु श्रोषमाणाः ॥ ७ ०५१ ०१
आदित्यासो अदितिर् मादयन्ताम् मित्रो अर्यमा वरुणो रजिष्ठाः ।
अस्माकं सन्तु भुवनस्य गोपाः पिबन्तु सोमम् अवसे नो अद्य ॥ ७ ०५१ ०२
आदित्या विश्वे मरुतश् च विश्वे देवाश् च विश्व ऋभवश् च विश्वे ।
इन्द्रो अग्निर् अश्विना तुष्टुवाना यूयम् पात स्वस्तिभिः सदा नः ॥ ७ ०५१ ०३

(५६८)

आदित्यासो अदितयः स्याम पूर् देवत्रा वसवो मर्त्यत्रा ।
सनेम मित्रावरुणा सनन्तो भवेम द्यावापृथिवी भवन्तः ॥ ७ ०५२ ०१
मित्रस् तन् नो वरुणो मामहन्त शर्म तोकाय तनयाय गोपाः ।
मा वो भुजेमान्यजातम् एनो मा तत् कर्म वसवो यच् चयध्वे ॥ ७ ०५२ ०२
तुरण्यवो ऽङ्गिरसो नक्षन्त रत्नं देवस्य सवितुर् इयानाः ।
पिता च तन् नो महान् यजत्रो विश्वे देवाः समनसो जुषन्त ॥ ७ ०५२ ०३

(५६९)

प्र द्यावा यज्ञैः पृथिवी नमोभिः सबाध ईळे बृहती यजत्रे ।
ते चिद् धि पूर्वे कवयो गृणन्तः पुरो मही दधिरे देवपुत्रे ॥ ७ ०५३ ०१
प्र पूर्वजे पितरा नव्यसीभिर् गीर्भिः कृणुध्वं सदने ऋतस्य ।
आ नो द्यावापृथिवी दैव्येन जनेन यातम् महि वां वरूथम् ॥ ७ ०५३ ०२
उतो हि वां रत्नधेयानि सन्ति पुरूणि द्यावापृथिवी सुदासे ।
अस्मे धत्तं यद् असद् अस्कृधोयु यूयम् पात स्वस्तिभिः सदा नः ॥ ७ ०५३ ०३

(५७०)

वास्तोष् पते प्रति जानीह्य् अस्मान् स्वावेशो अनमीवो भवा नः ।
यत् त्वेमहे प्रति तन् नो जुषस्व शं नो भव द्विपदे शं चतुष्पदे ॥ ७ ०५४ ०१
वास्तोष् पते प्रतरणो न एधि गयस्फानो गोभिर् अश्वेभिर् इन्दो ।
अजरासस् ते सख्ये स्याम पितेव पुत्रान् प्रति नो जुषस्व ॥ ७ ०५४ ०२
वास्तोष् पते शग्मया संसदा ते सक्षीमहि रण्वया गातुमत्या ।
पाहि क्षेम उत योगे वरं नो यूयम् पात स्वस्तिभिः सदा नः ॥ ७ ०५४ ०३

(५७१)

अमीवहा वास्तोष् पते विश्वा रूपाण्य् आविशन् ।
सखा सुशेव एधि नः ॥ ७ ०५५ ०१
यद् अर्जुन सारमेय दतः पिशङ्ग यच्छसे ।
वीव भ्राजन्त ऋष्टय उप स्रक्वेषु बप्सतो नि षु स्वप ॥ ७ ०५५ ०२
स्तेनं राय सारमेय तस्करं वा पुनःसर ।
स्तोतॄन् इन्द्रस्य रायसि किम् अस्मान् दुच्छुनायसे नि षु स्वप ॥ ७ ०५५ ०३
त्वं सूकरस्य दर्दृहि तव दर्दर्तु सूकरः ।
स्तोतॄन् इन्द्रस्य रायसि किम् अस्मान् दुच्छुनायसे नि षु स्वप ॥ ७ ०५५ ०४
सस्तु माता सस्तु पिता सस्तु श्वा सस्तु विश्पतिः ।
ससन्तु सर्वे ज्ञातयः सस्त्व् अयम् अभितो जनः ॥ ७ ०५५ ०५
य आस्ते यश् च चरति यश् च पश्यति नो जनः ।
तेषां सं हन्मो अक्षाणि यथेदं हर्म्यं तथा ॥ ७ ०५५ ०६
सहस्रशृङ्गो वृषभो यः समुद्राद् उदाचरत् ।
तेना सहस्येना वयं नि जनान् स्वापयामसि ॥ ७ ०५५ ०७
प्रोष्ठेशया वह्येशया नारीर् यास् तल्पशीवरीः ।
स्त्रियो याः पुण्यगन्धास् ताः सर्वाः स्वापयामसि ॥ ७ ०५५ ०८

(५७२)

क ई व्यक्ता नरः सनीळा रुद्रस्य मर्या अध स्वश्वाः ।
नकिर् ह्व एषां जनूंषि वेद ते अङ्ग विद्रे मिथो जनित्रम् ।
अभि स्वपूभिर् मिथो वपन्त वातस्वनसः श्येना अस्पृध्रन् ।
एतानि धीरो निण्या चिकेत पृश्निर् यद् ऊधो मही जभार ।
सा विट् सुवीरा मरुद्भिर् अस्तु सनात् सहन्ती पुष्यन्ती नृम्णम् ।
यामं येष्ठाः शुभा शोभिष्ठाः श्रिया सम्मिश्ला ओजोभिर् उग्राः ।
उग्रं व ओज स्थिरा शवांस्य् अधा मरुद्भिर् गणस् तुविष्मान् ।
शुभ्रो वः शुष्मः क्रुध्मी मनांसि धुनिर् मुनिर् इव शर्धस्य धृष्णोः ।
सनेम्य् अस्मद् युयोत दिद्युम् मा वो दुर्मतिर् इह प्रणङ् नः ।
प्रिया वो नाम हुवे तुराणाम् आ यत् तृपन् मरुतो वावशानाः ।
स्वायुधास इष्मिणः सुनिष्का उत स्वयं तन्व १ : शुम्भमानाः ।
शुची वो हव्या मरुतः शुचीनां शुचिं हिनोम्य् अध्वरं शुचिभ्यः ।
ऋतेन सत्यम् ऋतसाप आयञ् छुचिजन्मानः शुचयः पावकाः ॥ ७ ०५६ १२
अंसेष्व् आ मरुतः खादयो वो वक्षस्सु रुक्मा उपशिश्रियाणाः ।
वि विद्युतो न वृष्टिभी रुचाना अनु स्वधाम् आयुधैर् यच्छमानाः ॥ ७ ०५६ १३
प्र बुध्या व ईरते महांसि प्र नामानि प्रयज्यवस् तिरध्वम् ।
सहस्रियं दम्यम् भागम् एतं गृहमेधीयम् मरुतो जुषध्वम् ॥ ७ ०५६ १४
यदि स्तुतस्य मरुतो अधीथेत्था विप्रस्य वाजिनो हवीमन् ।
मक्षू रायः सुवीर्यस्य दात नू चिद् यम् अन्य आदभद् अरावा ॥ ७ ०५६ १५
अत्यासो न ये मरुतः स्वञ्चो यक्षदृशो न शुभयन्त मर्याः ।
ते ह्मर्येष्ठाः शिशवो न शुभ्रा वत्सासो न प्रक्रीळिनः पयोधाः ॥ ७ ०५६ १६
दशस्यन्तो नो मरुतो मृळन्तु वरिवस्यन्तो रोदसी सुमेके ।
आरे गोहा नृहा वधो वो अस्तु सुम्नेभिर् अस्मे वसवो नमध्वम् ॥ ७ ०५६ १७
आ वो होता जोहवीति सत्तः सत्राचीं रातिम् मरुतो गृणानः ।
य ईवतो वृषणो अस्ति गोपाः सो अद्वयावी हवते व उक्थैः ॥ ७ ०५६ १८
इमे तुरम् मरुतो रामयन्तीमे सहः सहस आ नमन्ति ।

इमे शंसं वनुष्यतो नि पान्ति गुरु द्वेषो अररुषे दधन्ति ॥ ७ ०५६ १९
इमे रध्रं चिन् मरुतो जुनन्ति भृमिं चिद् यथा वसवो जुषन्त ।
अप बाधध्वं वृषणस् तमांसि धत्त विश्वं तनयं तोकम् अस्मे ॥ ७ ०५६ २०
मा वो दात्रान् मरुतो निर् अराम मा पश्चाद् दघ्म रथ्यो विभागे ।
आ न स्पार्हे भजतना वसव्ये ३ यद् ईं सुजातं वृषणो वो अस्ति ॥ ७ ०५६ २१
सं यद् धनन्त मन्युभिर् जनासः शूरा यह्वीष्व् ओषधीषु विक्षु ।
अध स्मा नो मरुतो रुद्रियासस् त्रातारो भूत पृतनास्व् अर्यः ॥ ७ ०५६ २२
भूरि चक्र मरुतः पित्र्याण्य् उक्थानि या वः शस्यन्ते पुरा चित् ।
मरुद्भिर् उग्रः पृतनासु साळ्हा मरुद्भिर् इत् सनिता वाजम् अर्वा ॥ ७ ०५६ २३
अस्मे वीरो मरुतः शुष्म्य् अस्तु जनानां यो असुरो विधर्ता ।
अपो येन सुक्षितये तरेमाध स्वम् ओको अभि वः स्याम ॥ ७ ०५६ २४
तन् न इन्द्रो वरुणो मित्रो अग्निर् आप ओषधीर् वनिनो जुषन्त ।
शर्मन् स्याम मरुताम् उपस्थे यूयम् पात स्वस्तिभिः सदा नः ॥ ७ ०५६ २५

(५७३)
मध्वो वो नाम मारुतं यजत्राः प्र यज्ञेषु शवसा मदन्ति ।
ये रेजयन्ति रोदसी चिद् उर्वी पिन्वन्त्य् उत्सं यद् अयासुर् उग्राः ॥ ७ ०५७ ०१
निचेतारो हि मरुतो गृणन्तम् प्रणेतारो यजमानस्य मन्म ।
अस्माकम् अद्य विदथेषु बर्हिर् आ वीतये सदत पिप्रियाणाः ॥ ७ ०५७ ०२
नैतावद् अन्ये मरुतो यथेमे भ्राजन्ते रुक्मैर् आयुधैस् तनूभिः ।
आ रोदसी विश्वपिशः पिशानाः समानम् अञ्जय् अञ्जते शुभे कम् ॥ ७ ०५७ ०३
ऋधक् सा वो मरुतो दिद्युद् अस्तु यद् व आगः पुरुषता कराम ।
मा वस् तस्याम् अपि भूमा यजत्रा अस्मे वो अस्तु सुमतिश् चनिष्ठा ॥ ७ ०५७ ०४
कृते चिद् अत्र मरुतो रणन्तानवद्यासः शुचयः पावकाः ।
प्र णो ऽवत सुमतिभिर् यजत्राः प्र वाजेभिस् तिरत पुष्यसे नः ॥ ७ ०५७ ०५
उत स्तुतासो मरुतो व्यन्तु विश्वेभिर् नामभिर् नरो हवींषि ।
ददात नो अमृतस्य प्रजायै जिगृत रायः सूनृता मघानि ॥ ७ ०५७ ०६

आ स्तुतासो मरुतो विश्व ऊती अच्छा सूरीन् सर्वताता जिगात ।
ये नस् त्मना शतिनो वर्धयन्ति यूयम् पात स्वस्तिभिः सदा नः ॥ ७ ०५७ ०७

(५७४)

प्र साकमुक्षे अर्चता गणाय यो दैव्यस्य धाम्नस् तुविष्मान् ।
उत क्षोदन्ति रोदसी महित्वा नक्षन्ते नाकं निरृतेर् अवंशात् ॥ ७ ०५८ ०१
जनूश् चिद् वो मरुतस् त्वेष्येण भीमासस् तुविमन्यवो ऽयासः ।
प्र ये महोभिर् ओजसोत सन्ति विश्वो वो यामन् भयते स्वर्दृक् ॥ ७ ०५८ ०२
बृहद् वयो मघवद्भ्यो दधात जुजोषन्न् इन् मरुतः सुष्टुतिं नः ।
गतो नाध्वा वि तिराति जन्तुम् प्र ण स्पार्हाभिर् ऊतिभिस् तिरेत ॥ ७ ०५८ ०३
युष्मोतो विप्रो मरुतः शतस्वी युष्मोतो अर्वा सहुरिः सहस्री ।
युष्मोतः सम्राळ् उत हन्ति वृत्रम् प्र तद् वो अस्तु धूतयो देष्णम् ॥ ७ ०५८ ०४
ताꣳ आ रुद्रस्य मीळ्हुषो विवासे कुविन् नंसन्ते मरुतः पुनर् नः ।
यत् स्वर्ता जिहीळिरे यद् आविर् अव तद् एन ईमहे तुराणाम् ॥ ७ ०५८ ०५
प्र सा वाचि सुष्टुतिर् मघोनाम् इदं सूक्तम् मरुतो जुषन्त ।
आराच् चिद् द्वेषो वृषणो युयोत यूयम् पात स्वस्तिभिः सदा नः ॥ ७ ०५८ ०६

(५७५)

यं त्रायध्व इदम्-इदं देवासो यं च नयथ ।
तस्मा अग्ने वरुण मित्रार्यमन् मरुतः शर्म यच्छत ॥ ७ ०५९ ०१
युष्माकं देवा अवसाहनि प्रिय ईजानस् तरति द्विषः ।
प्र स क्षयं तिरते वि महीर् इषो यो वो वराय दाशति ॥ ७ ०५९ ०२
नहि वश् चरमं चन वसिष्ठः परिमंसते ।
अस्माकम् अद्य मरुतः सुते सचा विश्वे पिबत कामिनः ॥ ७ ०५९ ०३
नहि व ऊतिः पृतनासु मर्धति यस्मा अराध्वं नरः ।
अभि व आवर्त् सुमतिर् नवीयसी तूयं यात पिपीषवः ॥ ७ ०५९ ०४

ओ षु घृष्विराधसो यातनान्धांसि पीतये ।
इमा वो हव्या मरुतो ररे हि कम् मो ष्व् अ१ न्यत्र गन्तन ॥ ७ ०५९ ०५
आ च नो बर्हिः सदतावित च न स्पार्हाणि दातवे वसु ।
असेधन्तो मरुतः सोम्ये मधौ स्वाहेह मादयाध्वै ॥ ७ ०५९ ०६
सस्वश् चिद् धि तन्व१ : शुम्भमाना आ हंसासो नीलपृष्ठा अपप्तन् ।
विश्वं शर्धो अभितो मा नि षेद नरो न रण्वाः सवने मदन्तः ॥ ७ ०५९ ०७
यो नो मरुतो अभि दुर्हृणायुस् तिरश् चित्तानि वसवो जिघांसति ।
द्रुहः पाशान् प्रति स मुचीष्ट तपिष्ठेन हन्मना हन्तना तम् ॥ ७ ०५९ ०८
सांतपना इदं हविर् मरुतस् तज् जुजुष्टन ।
युष्माकोती रिशादसः ॥ ७ ०५९ ०९
गृहमेधास आ गत मरुतो माप भूतन ।
युष्माकोती सुदानवः ॥ ७ ०५९ १०
इहेह वः स्वतवसः कवयः सूर्यत्वचः ।
यज्ञम् मरुत आ वृणे ॥ ७ ०५९ ११
त्र्यम्बकं यजामहे सुगन्धिम् पुष्टिवर्धनम् ।
उर्वारुकम् इव बन्धनान् मृत्योर् मुक्षीय मामृतात् ॥ ७ ०५९ १२

(५७६)

यद् अद्य सूर्य ब्रवो ऽनागा उद्यन् मित्राय वरुणाय सत्यम् ।
वयं देवत्रादिते स्याम तव प्रियासो अर्यमन् गृणन्तः ॥ ७ ०६० ०१
एष स्य मित्रावरुणा नृचक्षा उभे उद् एति सूर्यो अभि ज्मन् ।
विश्वस्य स्थातुर् जगतश् च गोपा ऋजु मर्तेषु वृजिना च पश्यन् ॥ ७ ०६० ०२
अयुक्त सप्त हरितः सधस्थाद् या ई वहन्ति सूर्यं घृताचीः ।
धामानि मित्रावरुणा युवाकुः सं यो यूथेव जनिमानि चष्टे ॥ ७ ०६० ०३
उद् वाम् पृक्षासो मधुमन्तो अस्थुर् आ सूर्यो अरुहच् छुक्रम् अर्णः ।
यस्मा आदित्या अध्वनो रदन्ति मित्रो अर्यमा वरुणः सजोषाः ॥ ७ ०६० ०४
इमे चेतारो अनृतस्य भूरेर् मित्रो अर्यमा वरुणो हि सन्ति ।

इम ऋतस्य वावृधुर् दुरोणे शग्मासः पुत्रा अदितेर् अदब्धाः ॥ ७ ०६० ०५
इमे मित्रो वरुणो दूळभासो ऽचेतस चिच् चितयन्ति दक्षैः ।
अपि क्रतुं सुचेतसं वतन्तस् तिरश् चिद् अंहः सुपथा नयन्ति ॥ ७ ०६० ०६
इमे दिवो अनिमिषा पृथिव्याश् चिकित्वांसो अचेतस नयन्ति ।
प्रव्राजे चिन् नद्यो गाधम् अस्ति पारं नो अस्य विष्पितस्य पर्षन् ॥ ७ ०६० ०७
यद् गोपावद् अदितिः शर्म भद्रम् मित्रो यच्छन्ति वरुणः सुदासे ।
तस्मिन्न् आ तोकं तनयं दधाना मा कर्म देवहेळनं तुरासः ॥ ७ ०६० ०८
अव वेदिं होत्राभिर् यजेत रिपः काश् चिद् वरुणध्रुतः सः ।
परि द्वेषोभिर् अर्यमा वृणक्तुरुं सुदासे वृषणा उलोकम् ॥ ७ ०६० ०९
सस्वश् चिद् धि समृतिस् त्वेष्य् एषाम् अपीच्येन सहसा सहन्ते ।
युष्मद् भिया वृषणो रेजमाना दक्षस्य चिन् महिना मृळता नः ॥ ७ ०६० १०
यो ब्रह्मणे सुमतिम् आयजाते वाजस्य सातौ परमस्य रायः ।
सीक्षन्त मन्युम् मघवानो अर्य उरु क्षयाय चक्रिरे सुधातु ॥ ७ ०६० ११
इयं देव पुरोहितिर् युवभ्यां यज्ञेषु मित्रावरुणाव् अकारि ।
विश्वानि दुर्गा पिपृतं तिरो नो युयम् पात स्वस्तिभिः सदा नः ॥ ७ ०६० १२

(५७७)

उद् वां चक्षुर् वरुण सुप्रतीकं देवयोर् एति सूर्यस् ततन्वान् ।
अभि यो विश्वा भुवनानि चष्टे स मन्युम् मर्त्येष्व् आ चिकेत ॥ ७ ०६१ ०१
प्र वां स मित्रावरुणाव् ऋतावा विप्रो मन्मानि दीर्घश्रुद् इयर्ति ।
यस्य ब्रह्माणि सुक्रतू अवाथ आ यत् क्रत्वा न शरदः पृणैथे ॥ ७ ०६१ ०२
प्रोरोर् मित्रावरुणा पृथिव्याः प्र दिव ऋष्वाद् बृहतः सुदानू ।
स्पशो दधाथे ओषधीषु विक्ष्व् ऋधग् यतो अनिमिषं रक्षमाणा ॥ ७ ०६१ ०३
शंसा मित्रस्य वरुणस्य धाम शुष्मो रोदसी बद्बधे महित्वा ।
अयन् मासा अयज्वनाम् अवीराः प्र यज्ञमन्मा वृजनं तिराते ॥ ७ ०६१ ०४
अमूरा विश्वा वृषणाव् इमा वां न यासु चित्रं ददृशे न यक्षम् ।
द्रुहः सचन्ते अनृता जनानां न वां निण्यान्य् अचिते अभूवन् ॥ ७ ०६१ ०५

सम् उ॑ वां य॒ज्ञम् म॑हि॒यं नमो॑भिर् हु॒वे वा॑म् मित्रावरुणा स॒बाध॑: ।
प्र वा॒म् मन्मा॑न्य् ऋ॒चसे॒ नवा॑नि कृ॒तानि॒ ब्रह्म॑ जुजुषन्न् इ॒मानि॑ ॥ ७ ०६१ ०६
इ॒यं दे॑व पु॒रोहि॑तिर् यु॒वभ्या॑ य॒ज्ञेषु॑ मित्रावरुणाव् अकारि ।
विश्वा॑नि दु॒र्गा पि॑पृतं॒ तिरो॑ नो॑ यू॒यम् पा॑त स्व॒स्तिभि॒: सदा॑ न॒: ॥ ७ ०६१ ०७

(५७८)

उत् सूर्यो॑ बृ॒हद् अ॒र्चीष्य् अ॑श्रेत् पु॒रु विश्वा॒ जनि॑म मानु॒षाणाम् ।
स॒मो दि॒वा द॑दृ॒शे रोच॑मान॒: क्रत्वा॑ कृ॒त: सुकृ॑त: कर्तृभि॑र् भूत् ॥ ७ ०६२ ०१
स सू॑र्य प्रति॑ पु॒रो न उद् गा॑ एभि स्तोमे॑भिर् एत॒शेभि॒र् एवै॑: ।
प्र नो॑ मि॒त्राय॒ वरु॑णाय॒ वोचो ऽना॑गसो अर्य॒म्णे अ॒ग्नये॑ च ॥ ७ ०६२ ०२
वि न॑: स॒हस्रं॑ शु॒रुधो॑ रदन्त्व् ऋ॒तावा॑नो॒ वरु॑णो मि॒त्रो अ॒ग्नि: ।
यच्छ॑न्तु चन्द्रा उ॒पमं नो॑ अ॒र्कम् आ न॒: काम॑म् पूपुरन्तु स्तवा॑ना: ॥ ७ ०६२ ०३
द्यावा॑भूमी अदिते त्रासीथां नो॒ ये वां॑ ज॒ज्ञु: सु॒जनि॑मान ऋ॒ष्वे ।
मा हे॒ळे॑ भूम॒ वरु॑णस्य वा॒यो॒र् मा मि॒त्रस्य॑ प्रि॒यत॑मस्य नृ॒णाम् ॥ ७ ०६२ ०४
प्र बा॒हवा॑ सिसृतं जी॒वसे॑ न॒ आ नो॒ गव्यू॑तिम् उक्षतं घृ॒तेन॑ ।
आ नो॒ जने॑ श्रवयतं युवाना श्रु॒तम् मे॑ मित्रावरुणा हवे॒मा ॥ ७ ०६२ ०५
नू मि॒त्रो वरु॑णो अर्य॒मा नस् त्मने॑ तो॒काय॒ वरि॑वो दधन्तु ।
सु॒गा नो॒ विश्वा॑ सु॒पथा॑नि सन्तु यू॒यम् पा॑त स्व॒स्तिभि॒: सदा॑ न॒: ॥ ७ ०६२ ०६

(५७९)

उद् व् ए॑ति सु॒भगो॑ वि॒श्वच॑क्षा॒: साधा॑रण॒: सूर्यो॑ मानु॒षाणाम् ।
चक्षु॑र् मि॒त्रस्य॒ वरु॑णस्य॒ देवश् चर्मे॑व॒ य: स॒मवि॑व्यक् तमां॑सि ॥ ७ ०६३ ०१
उद् व् ए॑ति प्रसवी॒ता जना॑नाम् म॒हान् के॒तुर् अर्ण॑व: सू॒र्यस्य ।
स॒मा॒नं च॒क्रम् पर्या॑विवृ॒त्सन् यद् ए॒त॒शो वह॑ति धृ॒षु यु॒क्त: ॥ ७ ०६३ ०२
वि॒भ्राज॑मान उ॒षसा॑म् उ॒पस्था॒द् रेभै॒र् उद् ए॑त्य् अनुम॒द्यमा॑न: ।
ए॒ष मे॑ दे॒व: स॑वि॒ता च॑च्छन्द॒ य: स॑मा॒नं न प्र॑मि॒नाति॒ धाम॑ ॥ ७ ०६३ ०३

दिवो रुक्म उरुचक्षा उद् एति दूरेअर्थस् तरणिर् भ्राजमानः ।
नूनं जनाः सूर्येण प्रसूता अयन्न् अर्थानि कृणवन्न् अपांसि ॥ ७ ०६३ ०४
यत्रा चक्रुर् अमृता गातुम् अस्मै श्येनो न दीयन्न् अन्व् एति पाथः ।
प्रति वां सूर उदिते विधेम नमोभिर् मित्रावरुणोत हव्यैः ॥ ७ ०६३ ०५
नू मित्रो वरुणो अर्यमा नस् त्मने तोकाय वरिवो दधन्तु ।
सुगा नो विश्वा सुपथानि सन्तु यूयम् पात स्वस्तिभिः सदा नः ॥ ७ ०६३ ०६

(५८०)

दिवि क्षयन्ता रजसः पृथिव्याम् प्र वां घृतस्य निर्णिजो ददीरन् ।
हव्यं नो मित्रो अर्यमा सुजातो राजा सुक्षत्रो वरुणो जुषन्त ॥ ७ ०६४ ०१
आ राजाना महृतस्य गोपा सिन्धुपती क्षत्रिया यातम् अर्वाक् ।
इळां नो मित्रावरुणोत वृष्टिम् अव दिव इन्वतं जीरदानू ॥ ७ ०६४ ०२
मित्रस् तन् नो वरुणो देवो अर्यः प्र साधिष्ठभिः पथिभिर् नयन्तु ।
ब्रवद् यथा न आद् अरिः सुदास इषा मदेम सह देवगोपाः ॥ ७ ०६४ ०३
यो वां गर्तम् मनसा तक्षद् एतम् ऊर्ध्वां धीतिं कृणवद् धारयच् च ।
उक्षेथाम् मित्रावरुणा घृतेन ता राजाना सुक्षितीस् तर्पयेथाम् ॥ ७ ०६४ ०४
एष स्तोमो वरुण मित्र तुभ्यं सोमः शुक्रो न वायवे ऽयामि ।
अविष्टं धियो जिगृतम् पुरंधीर् यूयम् पात स्वस्तिभिः सदा नः ॥ ७ ०६४ ०५

(५८१)

प्रति वां सूर उदिते सूक्तैर् मित्रं हुवे वरुणम् पूतदक्षम् ।
ययोर् असुर्यꣳ म् अक्षितं ज्येष्ठं विश्वस्य यामन्न् आचिता जिगत्नु ॥ ७ ०६५ ०१
ता हि देवानाम् असुरा ताव् अर्या ता नः क्षितीः करतम् ऊर्जयन्तीः ।
अश्याम मित्रावरुणा वयं वां द्यावा च यत्र पीपयन्न् अहा च ॥ ७ ०६५ ०२
ता भूरिपाशाव् अनृतस्य सेतू दुरत्येतू रिपवे मर्त्याय ।
ऋतस्य मित्रावरुणा पथा वाम् अपो न नावा दुरिता तरेम ॥ ७ ०६५ ०३

आ नो॑ मित्रावरुणा ह॒व्यजु॑ष्टिं घृ॒तैर् गव्यू॑तिम् उक्षतम् इळा॑भिः ।
प्रति॑ वाम् अत्र वरम् आ जनाय पृणी॒तम् उ॒ग्नो दि॒व्यस्य॒ चारोः॑ ॥ ७ ०६५ ०४
ए॒ष स्तोमो॑ वरुण मित्र तुभ्यं॑ सोमः॑ शु॒क्रो न वा॒यवे॑ ऽयामि ।
अ॒वि॒ष्टं धियो॑ जिगृतम् पुरं॑धीर् यू॒यम् पा॑त स्व॒स्तिभि॒ः सदा॑ नः ॥ ७ ०६५ ०५

(५८२)
प्र मि॒त्रयो॒र् वरु॑णयो॒ स्तोमो॑ न एतु शू॒ष्यः ।
नमस्वान् तुविजा॒तयोः॑ ॥ ७ ०६६ ०१
या धा॒रय॑न्त दे॒वाः सुदक्षा॒ दक्ष॑पितरा ।
अ॒सु॒र्या॑य प्रम॑हसा ॥ ७ ०६६ ०२
ता न॑ स्तिपा तनूपा वरु॑ण जरितॄणाम् ।
मित्र॑ साधय॑तं धियः॑ ॥ ७ ०६६ ०३
यद् अ॒द्य सू॒र उदि॒ते ऽना॑गा मि॒त्रो अ॑र्य॒मा ।
सु॒वाति॑ सवि॒ता भगः॑ ॥ ७ ०६६ ०४
सुप्रा॒वीर् अ॑स्तु स क्षय॒ः प्र नु याम॑न् सुदानवः ।
ये नो॒ अंहो॑ ऽति॒पिप्र॑ति ॥ ७ ०६६ ०५
उ॒त स्व॒राजो॒ अदि॑ति॒र् अद॑ब्धस्य व्र॒तस्य॒ ये ।
म॒हो राजा॑न ईशते ॥ ७ ०६६ ०६
प्रति॑ वां सू॒र उदि॑ते मि॒त्रं गृ॑णीषे वरु॑णम् ।
अर्यमणं॑ रिशाद॑सम् ॥ ७ ०६६ ०७
रा॒या हि॑रण्य॒या म॒तिर् इ॒यम् अ॑वृ॒काय॒ शव॑से ।
इ॒यं विप्रा॑ मे॒धसा॑तये ॥ ७ ०६६ ०८
ते स्या॑म देव वरुण॒ ते मि॑त्र सू॒रिभिः॑ स॒ह ।
इ॒षं स्वश् च धीमहि ॥ ७ ०६६ ०९
ब॒हव॒ः सूर॑चक्षसो ऽग्निजि॒ह्वा ऋ॒ता॒वृधः॑ ।
त्रीणि॒ ये ये॒मुर् वि॒दथा॑नि धी॒तिभि॒र् विश्वा॑नि परि॑भूतिभिः ॥ ७ ०६६ १०
वि ये द॒धुः श॒र॒दम् मास॒म् आद् अह॒र् य॒ज्ञम् अ॒क्तुं चाद् ऋ॒च॑म् ।

अनाप्यं वरुणो मित्रो अर्यमा क्षत्रं राजान आशत ॥ ७ ०६६ ११
तद् वो अद्य मनामहे सूक्तैः सूर उदिते ।
यद् ओहते वरुणो मित्रो अर्यमा यूयम् ऋतस्य रथ्यः ॥ ७ ०६६ १२
ऋतावान ऋतजाता ऋतावृधो घोरासो अनृतद्विषः ।
तेषां वः सुम्ने सुच्छर्दिष्टमे नरः स्याम ये च सूरयः ॥ ७ ०६६ १३
उद् उ त्यद् दर्शतं वपुर् दिव एति प्रतिह्वरे ।
यद् ईम् आशुर् वहति देव एतशो विश्वस्मै चक्षसे अरम् ॥ ७ ०६६ १४
शीर्ष्णः-शीर्ष्णो जगतस् तस्थुषस् पतिं समया विश्वम् आ रजः ।
सप्त स्वसारः सुविताय सूर्यं वहन्ति हरितो रथे ॥ ७ ०६६ १५
तच् चक्षुर् देवहितं शुक्रम् उच्चरत् ।
पश्येम शरदः शतं जीवेम शरदः शतम् ॥ ७ ०६६ १६
काव्येभिर् अदाभ्या यातं वरुण द्युमत् ।
मित्रश् च सोमपीतये ॥ ७ ०६६ १७
दिवो धामभिर् वरुण मित्रश् चा यातम् अद्रुहा ।
पिबतं सोमम् आतुजी ॥ ७ ०६६ १८
आ यातम् मित्रावरुणा जुषाणाव् आहुतिं नरा ।
पातं सोमम् ऋतावृधा ॥ ७ ०६६ १९

(५८३)

प्रति वां रथं नृपती जरध्यै हविष्मता मनसा यज्ञियेन ।
यो वां दूतो न धिष्ण्याव् अजीगर् अच्छा सूनुर् न पितरा विवक्मि ॥ ७ ०६७ ०१
अशोच्य् अग्निः समिधानो अस्मे उपो अदृश्रन् तमसश् चिद् अन्ताः ।
अचेति केतुर् उषसः पुरस्ताच् छ्रिये दिवो दुहितुर् जायमानः ॥ ७ ०६७ ०२
अभि वां नूनम् अश्विना सुहोता स्तोमैः सिषक्ति नासत्या विवक्वान् ।
पूर्वीभिर् यातम् पथ्याभिर् अर्वाक् स्वर्विदा वसुमता रथेन ॥ ७ ०६७ ०३
अवोर् वां नूनम् अश्विना युवाकुर् हुवे यद् वां सुते माध्वी वसूयुः ।
आ वां वहन्तु स्थविरासो अश्वाः पिबाथो अस्मे सुषुता मधूनि ॥ ७ ०६७ ०४

प्राचीम् उ देवाश्विना धियम् मे ऽमृध्रां सातये कृतं वसुयुम् ।
विश्वा अविष्टं वाज आ पुरंधीस् ता नः शक्तं शचीपती शचीभिः ॥ ७ ०६७ ०५
अविष्टं धीष्व् अश्विना न आसु प्रजावद् रेतो अह्रयं नो अस्तु ।
आ वां तोके तनये तूतुजानाः सुरत्नासो देववीतिं गमेम ॥ ७ ०६७ ०६
एष स्य वाम् पूर्वगत्वेव सख्ये निधिर् हितो माध्वी रातो अस्मे ।
अहेळता मनसा यातम् अर्वाग् अश्नन्ता हव्यम् मानुषीषु विक्षु ॥ ७ ०६७ ०७
एकस्मिन् योगे भुरणा समाने परि वां सप्त स्रवतो रथो गात् ।
न वायन्ति सुभ्वो देवयुक्ता ये वां धूर्षु तरणयो वहन्ति ॥ ७ ०६७ ०८
असश्चता मघवद्भ्यो हि भूतं ये राया मघदेयं जुनन्ति ।
प्र ये बन्धुं सूनृताभिस् तिरन्ते गव्या पृञ्चन्तो अश्व्या मघानि ॥ ७ ०६७ ०९
नू मे हवम् आ शृणुतं युवाना यासिष्टं वर्तिर् अश्विनाव् इरावत् ।
धत्तं रत्नानि जरतं च सूरीन् युयम् पात स्वस्तिभिः सदा नः ॥ ७ ०६७ १०

(५८४)

आ शुभ्रा यातम् अश्विना स्वश्वा गिरो दस्रा जुजुषाणा युवाकोः ।
हव्यानि च प्रतिभृता वीतं नः ॥ ७ ०६८ ०१
प्र वाम् अन्धांसि मद्यान्य् अस्थुर् अरं गन्तं हविषो वीतये मे ।
तिरो अर्यो हवनानि श्रुतं नः ॥ ७ ०६८ ०२
प्र वां रथो मनोजवा इयर्ति तिरो रजांस्य् अश्विना शतोतिः ।
अस्मभ्यं सूर्यावसू इयानः ॥ ७ ०६८ ०३
अयं ह यद् वां देवया उ अद्रिर् ऊर्ध्वो विवक्ति सोमसुद् युवभ्याम् ।
आ वल्गू विप्रो ववृतीत हव्यैः ॥ ७ ०६८ ०४
चित्रं ह यद् वाम् भोजनं न्व् अस्ति न्य् अत्रये महिष्वन्तं युयोतम् ।
यो वाम् ओमानं दधते प्रियः सन् ॥ ७ ०६८ ०५
उत त्यद् वां जुरते अश्विना भूच् च्यवानाय प्रतीत्यं हविर्दे ।
अधि यद् वपुं इतौउति धत्थः ॥ ७ ०६८ ०६
उत त्यम् भुज्युम् अश्विना सखायो मध्ये जहुर् दुरेवासः समुद्रे ।

निर् ईम् पर्षद् अरावा यो युवाकुः ॥ ७ ०६८ ०७
वृकाय चिज् जसमानाय शक्तम् उत श्रुतं शयवे हूयमाना ।
याव् अघ्न्याम् अपिन्वतम् अपो न स्तर्यं चिच् छक्त्य् अश्विना शचीभिः ॥ ७ ०६८ ०८
एष स्य कारुर् जरते सूक्तैर् अग्रे बुधान उषसां सुमन्मा ।
इषा तं वर्धद् अघ्न्या पयोभिर् यूयम् पात स्वस्तिभिः सदा नः ॥ ७ ०६८ ०९

(५८५)
आ वां रथो रोदसी बद्बधानो हिरण्ययो वृषभिर् यात्व् अश्वैः ।
घृतवर्तनिः पविभी रुचान इषां वोळ्हा नृपतिर् वाजिनीवान् ॥ ७ ०६९ ०१
स प्रप्रथानो अभि पञ्च भूमा त्रिवन्धुरो मनसा यातु युक्तः ।
विशो येन गच्छथो देवयन्तीः कुत्रा चिद् यामम् अश्विना दधाना ॥ ७ ०६९ ०२
स्वश्वा यशसा यातम् अर्वाग् दस्रा निधिम् मधुमन्तम् पिबाथः ।
वि वां रथो वध्वा ३ यादमानो ऽन्तान् दिवो बाधते वर्तनिभ्याम् ॥ ७ ०६९ ०३
युवोः श्रियम् परि योषावृणीत सूरो दुहिता परितक्म्यायाम् ।
यद् देवयन्तम् अवथः शचीभिः परि घ्रंसम् ओमना वां वयो गात् ॥ ७ ०६९ ०४
यो ह स्य वां रथिरा वस्त उस्रा रथो युजानः परियाति वर्तिः ।
तेन नः शं योर् उषसो व्युष्टौ न्य् अश्विना वहतं यज्ञे अस्मिन् ॥ ७ ०६९ ०५
नरा गौरेव विद्युत तृषाणास्माकम् अद्य सवनोप यातम् ।
पुरुत्रा हि वाम् मतिभिर् हवन्ते मा वाम् अन्ये नि यमन् देवयन्तः ॥ ७ ०६९ ०६
युवम् भुज्युम् अर्णसो अस्रिधानैः ।
पतत्रिभिर् अश्रमैर् अव्यथिभिर् दंसनाभिर् अश्विना पारयन्ता ॥ ७ ०६९ ०७
नू मे हवम् आ शृणुतं युवाना यासिष्टं वर्तिर् अश्विनाव् इरावत् ।
धत्तं रत्नानि जरतं च सूरीन् यूयम् पात स्वस्तिभिः सदा नः ॥ ७ ०६९ ०८

(५८६)
आ विश्ववाराश्विना गतं नः प्र तत् स्थानम् अवाचि वाम् पृथिव्याम् ।

अश्वो न वाजी शुनपृष्ठो अस्थाद् आ यत् सेदथुर् ध्रुवसे न योनिम् ॥ ७ ०७० ०१
सिषक्ति सा वां सुमतिश् चनिष्ठातापि घर्मो मनुषो दुरोणे ।
यो वां समुद्रान् सरितः पिपर्त्य् एतग्वा चिन् न सुयुजा युजानः ॥ ७ ०७० ०२
यानि स्थानान्य् अश्विना दधाथे दिवो यद्ध्वीष्व् ओषधीषु विक्षु ।
नि पर्वतस्य मूर्धनि सदन्तेषं जनाय दाशुषे वहन्ता ॥ ७ ०७० ०३
चनिष्टं देवा ओषधीष्व् अप्सु यद् योग्या अश्नवैथे ऋषीणाम् ।
पुरूणि रत्ना दधतौ न्य् अ १ स्मे अनु पूर्वाणि चख्यथुर् युगानि ॥ ७ ०७० ०४
शुश्रुवांसा चिद् अश्विना पुरूण्य् अभि ब्रह्माणि चक्षाथे ऋषीणाम् ।
प्रति प्र यातं वरम् आ जनायास्मे वाम् अस्तु सुमतिश् चनिष्ठा ॥ ७ ०७० ०५
यो वां यज्ञो नासत्या हविष्मान् कृतब्रह्मा समर्यो ३ भवाति ।
उप प्र यातं वरम् आ वसिष्ठम् इमा ब्रह्माण्य् ऋच्यन्ते युवभ्याम् ॥ ७ ०७० ०६
इयम् मनीषा इयम् अश्विना गीर् इमां सुवृक्तिं वृषणा जुषेथाम् ।
इमा ब्रह्माणि युवयून्य् अग्मन् युयम् पात स्वस्तिभिः सदा नः ॥ ७ ०७० ०७

(५८७)

अप स्वसुर् उषसो नग् जिहीते रिणक्ति कृष्णीर् अरुषाय पन्थाम् ।
अश्वामघा गोमघा वां हुवेम दिवा नक्तं शरुम् अस्मद् युयोतम् ॥ ७ ०७१ ०१
उपायातं दाशुषे मर्त्याय रथेन वामम् अश्विना वहन्ता ।
युयुतम् अस्मद् अनिराम् अमीवां दिवा नक्तम् माध्वी त्रासीथां नः ॥ ७ ०७१ ०२
आ वां रथम् अवमस्यां व्युष्टौ सुम्नायवो वृषणो वर्तयन्तु ।
स्यूमगभस्तिम् ऋतयुग्भिर् अश्वैर् आश्विना वसुमन्तं वहेथाम् ॥ ७ ०७१ ०३
यो वां रथो नृपती अस्ति वोळ्हा त्रिवन्धुरो वसुमाꣳ उस्रयामा ।
आ न एना नासत्योप यातम् अभि यद् वां विश्वप्स्न्यो जिगाति ॥ ७ ०७१ ०४
युवं च्यवानं जरसो ऽमुमुक्तं नि पेदव ऊहथुर् आशुम् अश्वम् ।
निर् अंहसस् तमस स्पर्तम् अत्रिं नि जाहुषं शिथिरे धातम् अन्तः ॥ ७ ०७१ ०५
इयम् मनीषा इयम् अश्विना गीर् इमां सुवृक्तिं वृषणा जुषेथाम् ।
इमा ब्रह्माणि युवयून्य् अग्मन् युयम् पात स्वस्तिभिः सदा नः ॥ ७ ०७१ ०६

(५८८)

आ गोमता नासत्या रथेनाश्वावता पुरुश्चन्द्रेण यातम् ।
अभि वां विश्वा नियुतः सचन्ते स्पार्हया श्रिया तन्वा शुभाना ॥ ७ ०७२ ०१
आ नो देवेभिर् उप यातम् अर्वाक् सजोषसा नासत्या रथेन ।
युवोर् हि नः सख्या पित्र्याणि समानो बन्धुर् उत तस्य वित्तम् ॥ ७ ०७२ ०२
उद् उ स्तोमासो अश्विनोर् अबुध्रञ् जामि ब्रह्माण्य् उषसश् च देवीः ।
आविवासन् रोदसी धिष्ण्येमे अच्छा विप्रो नासत्या विवक्ति ॥ ७ ०७२ ०३
वि चेद् उच्छन्त्य् अश्विना उषासः प्र वाम् ब्रह्माणि कारवो भरन्ते ।
ऊर्ध्वम् भानुं सविता देवो अश्रेद् बृहद् अग्नयः समिधा जरन्ते ॥ ७ ०७२ ०४
आ पश्चातान् नासत्या पुरस्ताद् आश्विना यातम् अधराद् उदक्तात् ।
आ विश्वतः पाञ्चजन्येन राया युयम् पात स्वस्तिभिः सदा नः ॥ ७ ०७२ ०५

(५८९)

अतारिष्म तमसस् पारम् अस्य प्रति स्तोमं देवयन्तो दधानाः ।
पुरुदंसा पुरुतमा पुराजामर्त्या हवते अश्विना गीः ॥ ७ ०७३ ०१
न्य् उ प्रियो मनुषः सादि होता नासत्या यो यजते वन्दते च ।
अश्नीतम् मध्वो अश्विना उपाक आ वां वोचे विदथेषु प्रयस्वान् ॥ ७ ०७३ ०२
अहेम यज्ञम् पथाम् उराणा इमां सुवृक्तिं वृषणा जुषेथाम् ।
श्रुष्टीवेव प्रेषितो वाम् अबोधि प्रति स्तोमैर् जरमाणो वसिष्ठः ॥ ७ ०७३ ०३
उप त्या वह्नी गमतो विशं नो रक्षोहणा सम्भृता वीळुपाणी ।
सम् अन्धांस्य् अग्मत मत्सराणि मा नो मर्धिष्टम् आ गतं शिवेन ॥ ७ ०७३ ०४
आ पश्चातान् नासत्या पुरस्ताद् आश्विना यातम् अधराद् उदक्तात् ।
आ विश्वतः पाञ्चजन्येन राया युयम् पात स्वस्तिभिः सदा नः ॥ ७ ०७३ ०५

(५९०)

इमा उ वां दिविष्टय उस्रा हवन्ते अश्विना ।
अयं वाम् अह्वे ऽवसे शचीवसू विशं-विशं हि गच्छथः ॥ ७ ०७४ ०१
युवं चित्रं ददथुर् भोजनं नरा चोदेथां सूनृतावते ।
अर्वाग् रथं समनसा नि यच्छतम् पिबतं सोम्यम् मधु ॥ ७ ०७४ ०२
आ यातम् उप भूषतम् मध्वः पिबतम् अश्विना ।
दुग्धम् पयो वृषणा जेन्यावसू मा नो मर्धिष्टम् आ गतम् ॥ ७ ०७४ ०३
अश्वासो ये वाम् उप दाशुषो गृहं युवां दीयन्ति बिभ्रतः ।
मक्षूयुभिर् नरा हयेभिर् अश्विना देवा यातम् अस्मयू ॥ ७ ०७४ ०४
अधा ह यन्तो अश्विना पृक्षः सचन्त सूरयः ।
ता यंसतो मघवद्भ्यो ध्रुवं यशश् छर्दिर् अस्मभ्यं नासत्या ॥ ७ ०७४ ०५
प्र ये ययुर् अवृकासो रथा इव नृपातारो जनानाम् ।
उत स्वेन शवसा शूशुवुर् नर उत क्षियन्ति सुक्षितिम् ॥ ७ ०७४ ०६

(५९१)

व्य् उ ष्ं षा आवो दिविजा ऋतेनाविष्कृण्वाना महिमानम् आगात् ।
अप द्वहस् तम आवर् अजुष्टम् अङ्गिरस्तमा पथ्या अजीगः ॥ ७ ०७५ ०१
महे नो अद्य सुविताय बोध्य् उषो महे सौभगाय प्र यन्धि ।
चित्रं रयिं यशसं धेह्य् अस्मे देवि मर्तेषु मानुषि श्रवस्युम् ॥ ७ ०७५ ०२
एते त्ये भानवो दर्शतायाश् चित्रा उषसो अमृतास आगुः ।
जनयन्तो दैव्यानि व्रतान्य् आपृणन्तो अन्तरिक्षा व्य् अस्थुः ॥ ७ ०७५ ०३
एषा स्या युजाना पराकात् पञ्च क्षितीः परि सद्यो जिगाति ।
अभिपश्यन्ती वयुना जनानां दिवो दुहिता भुवनस्य पत्नी ॥ ७ ०७५ ०४
वाजिनीवती सूर्यस्य योषा चित्रामघा राय ईशे वसूनाम् ।
ऋषिष्टुता जरयन्ती मघोन्य् उषा उच्छति वह्निभिर् गृणाना ॥ ७ ०७५ ०५
प्रति द्युतानाम् अरुषासो अश्वाश् चित्रा अदृश्रन् उषसं वहन्तः ।
याति शुभ्रा विश्वपिशा रथेन दधाति रत्नं विधते जनाय ॥ ७ ०७५ ०६

सत्या सत्येभिर् महती महद्भिर् देवी देवेभिर् यजता यजत्रैः ।
रुजद् दृळ्हानि ददद् उस्रियाणाम् प्रति गाव उषसो वावशन्त ॥ ७ ०७५ ०७
नू नो गोमद् वीरवद् धेहि रत्नम् उषो अश्वावद् पुरुभोजो अस्मे ।
मा नो बर्हिः पुरुषता निदे कर् यूयम् पात स्वस्तिभिः सदा नः ॥ ७ ०७५ ०८

(५९२)

उद् उ ज्योतिर् अमृतं विश्वजन्यं विश्वानरः सविता देवो अश्रेत् ।
कृत्वा देवानाम् अजनिष्ट चक्षुर् आविर् अकर् भुवनं विश्वम् उषाः ॥ ७ ०७६ ०१
प्र मे पन्था देवयाना अदृश्रन् अमर्धन्तो वसुभिर् इष्कृतासः ।
अभूद् उ केतुर् उषसः पुरस्तात् प्रतीच्य् आगाद् अधि हर्म्येभ्यः ॥ ७ ०७६ ०२
तानीद् अहानि बहुलान्य् आसन् या प्राचीनम् उदिता सूर्यस्य ।
यतः परि जार इवाचरन्त्य् उषो ददृक्षे न पुनर् यतीव ॥ ७ ०७६ ०३
त इद् देवानां सधमाद आसन् ऋतावानः कवयः पूर्व्यासः ।
गूळ्हं ज्योतिः पितरो अन्व् अविन्दन् सत्यमन्त्रा अजनयन्न् उषासम् ॥ ७ ०७६ ०४
समान ऊर्वे अधि संगतासः सं जानते न यतन्ते मिथस् ते ।
ते देवानां न मिनन्ति व्रतान्य् अमर्धन्तो वसुभिर् यादमानाः ॥ ७ ०७६ ०५
प्रति त्वा स्तोमैर् ईळते वसिष्ठा उषर्बुधः सुभगे तुष्टुवांसः ।
गवां नेत्री वाजपत्नी न उच्छोषः सुजाते प्रथमा जरस्व ॥ ७ ०७६ ०६
एषा नेत्री राधसः सूनृतानाम् उषा उच्छन्ती रिभ्यते वसिष्ठैः ।
दीर्घश्रुतं रयिम् अस्मे दधाना यूयम् पात स्वस्तिभिः सदा नः ॥ ७ ०७६ ०७

(५९३)

उपो रुरुचे युवतिर् न योषा विश्वं जीवम् प्रसुवन्ती चरायै ।
अभूद् अग्निः समिधे मानुषाणाम् अकर् ज्योतिर् बाधमाना तमांसि ॥ ७ ०७७ ०१
विश्वम् प्रतीची सप्रथा उद् अस्थाद् रुशद् वासो बिभ्रती शुक्रम् अश्वैत् ।
हिरण्यवर्णा सुदृशीकसंदृग् गवाम् माता नेत्र्य् अह्नाम् अरोचि ॥ ७ ०७७ ०२

देवानां चक्षुः सुभगा वहन्ती श्वेतं नयन्ती सुदृशीकम् अश्वम् ।
उषा अदर्शि रश्मिभिर् व्यक्ता चित्रामघा विश्वम् अनु प्रभूता ॥ ७ ०७७ ०३
अन्तिवामा दूरे अमित्रम् उच्छोर्वीं गव्यूतिम् अभयं कृधी नः ।
यावय द्वेष आ भरा वसूनि चोदय राधो गृणते मघोनि ॥ ७ ०७७ ०४
अस्मे श्रेष्ठेभिर् भानुभिर् वि भाह्य् उषो देवि प्रतिरन्ती न आयुः ।
इषं च नो दधती विश्ववारे गोमद् अश्वावद् रथवच् च राधः ॥ ७ ०७७ ०५
यां त्वा दिवो दुहितर् वर्धयन्त्य् उषः सुजाते मतिभिर् वसिष्ठाः ।
सास्मासु धा रयिम् ऋष्वम् बृहन्तं यूयम् पात स्वस्तिभिः सदा नः ॥ ७ ०७७ ०६

(५१४)

प्रति केतवः प्रथमा अदृश्रन्न् ऊर्ध्वा अस्या अञ्जयो वि श्रयन्ते ।
उषो अर्वाचा बृहता रथेन ज्योतिष्मता वामम् अस्मभ्यं वक्षि ॥ ७ ०७८ ०१
प्रति षीम् अग्निर् जरते समिद्धः प्रति विप्रासो मतिभिर् गृणन्तः ।
उषा याति ज्योतिषा बाधमाना विश्वा तमांसि दुरिताप देवी ॥ ७ ०७८ ०२
एता उ त्याः प्रत्य् अदृश्रन् पुरस्ताज् ज्योतिर् यच्छन्तीर् उषसो विभातीः ।
अजीजनन् सूर्यं यज्ञम् अग्निम् अपाचीनं तमो अगाद् अजुष्टम् ॥ ७ ०७८ ०३
अचेति दिवो दुहिता मघोनी विश्वे पश्यन्त्य् उषसं विभातीम् ।
आस्थाद् रथं स्वधया युज्यमानम् आ यम् अश्वासः सुयुजो वहन्ति ॥ ७ ०७८ ०४
प्रति त्वाद्य सुमनसो बुधन्तास्माकासो मघवानो वयं च ।
तिल्विलायध्वम् उषसो विभातीर् यूयम् पात स्वस्तिभिः सदा नः ॥ ७ ०७८ ०५

(५१५)

व्य् उ १ षा आवः पथ्या ३ जनानाम् पञ्च क्षितीर् मानुषीर् बोधयन्ती ।
सुसंदृग्भिर् उक्षभिर् भानुम् अश्रेद् वि सूर्यो रोदसी चक्षसावः ॥ ७ ०७९ ०१
व्य् अञ्जते दिवो अन्तेष्व् अक्तून् विशो न युक्ता उषसो यतन्ते ।
सं ते गावस् तम आ वर्तयन्ति ज्योतिर् यच्छन्ति सवितेव बाहू ॥ ७ ०७९ ०२

अभूद् उषा इन्द्रतमा मघोन्य् अजीजनत् सुविताय श्रवांसि ।
वि दिवो देवी दुहिता दधात्य् अङ्गिरस्तमा सुकृते वसूनि ॥ ७ ०७९ ०३
तावद् उषो राधो अस्मभ्यं रास्व यावत् स्तोतृभ्यो अरदो गृणाना ।
यां त्वा जज्ञुर् वृषभस्या रवेण वि दुळ्हस्य दुरो अद्रेर् और्णोः ॥ ७ ०७९ ०४
देवं-देवं राधसे चोदयन्त्य् अस्मद्र्यक् सूनृता ईरयन्ती ।
व्युच्छन्ती नः सनये धियो धा यूयम् पात स्वस्तिभिः सदा नः ॥ ७ ०७९ ०५

(५९६)

प्रति स्तोमेभिर् उषसं वसिष्ठा गीर्भिर् विप्रासः प्रथमा अबुध्रन् ।
विवर्तयन्तीं रजसी समन्ते आविष्कृण्वतीम् भुवनानि विश्वा ॥ ७ ०८० ०१
एषा स्या नव्यम् आयुर् दधाना गूढ्वी तमो ज्योतिषोषा अबोधि ।
अग्रं एति युवतिर् अह्नयाणा प्राचिकितत् सूर्यं यज्ञम् अग्निम् ॥ ७ ०८० ०२
अश्वावतीर् गोमतीर् न उषासो वीरवतीः सदम् उच्छन्तु भद्राः ।
घृतं दुहाना विश्वतः प्रपीता यूयम् पात स्वस्तिभिः सदा नः ॥ ७ ०८० ०३

(५९७)

प्रत्य् उ अदर्श्य् आयत्य् उ ९ च्छन्ती दुहिता दिवः ।
अपो महि व्ययति चक्षसे तमो ज्योतिष् कृणोति सूनरी ॥ ७ ०८१ ०१
उद् उस्रियाः सृजते सूर्यः सचा उद्यन् नक्षत्रम् अर्चिवत् ।
तवेद् उषो व्युषि सूर्यस्य च सम् भक्तेन गमेमहि ॥ ७ ०८१ ०२
प्रति त्वा दुहितर् दिव उषो जीरा अभुत्स्महि ।
या वहसि पुरु स्पार्हं वनन्वति रत्नं न दाशुषे मयः ॥ ७ ०८१ ०३
उच्छन्ती या कृणोषि महना महि प्रख्यै देवि स्वर् दृशे ।
तस्यास् ते रत्नभाज ईमहे वयं स्याम मातुर् न सूनवः ॥ ७ ०८१ ०४
तच् चित्रं राध आ भरोषो यद् दीर्घश्रुत्तमम् ।
यत् ते दिवो दुहितर् मर्तभोजनं तद् रास्व भुनजामहै ॥ ७ ०८१ ०५

श्रवः सूरिभ्यो अमृतं वसुत्वनं वाजाꣳ अस्मभ्यं गोमतः ।
चोदयित्री मघोनः सूनृतावत्य् उषा उच्छद् अप स्रिधः ॥ ७ ०८१ ०६

(५१८)

इन्द्रावरुणा युवम् अध्वराय नो विशे जनाय महि शर्म यच्छतम् ।
दीर्घप्रयज्युम् अति यो वनुष्यति वयं जयेम पृतनासु दुढ्यः ॥ ७ ०८२ ०१
सम्राळ् अन्यः स्वराळ् अन्य उच्यते वाम् महान्ताव् इन्द्रावरुणा महावसू ।
विश्वे देवासः परमे व्योमनि सं वाम् ओजो वृषणा सम् बलं दधुः ॥ ७ ०८२ ०२
अन्व् अपां खान्य् अतृन्तम् ओजसा सूर्यम् ऐरयतं दिवि प्रभुम् ।
इन्द्रावरुणा मदे अस्य मायिनो ऽपिन्वतम् अपितः पिन्वतं धियः ॥ ७ ०८२ ०३
युवाम् इद् युत्सु पृतनासु वह्नयो युवां क्षेमस्य प्रसवे मितज्ञवः ।
ईशाना वस्व उभयस्य कारव इन्द्रावरुणा सुहवा हवामहे ॥ ७ ०८२ ०४
इन्द्रावरुणा यद् इमानि चक्रथुर् विश्वा जातानि भुवनस्य मज्मना ।
क्षेमेण मित्रो वरुणं दुवस्यति मरुद्भिर् उग्रः शुभम् अन्य ईयते ॥ ७ ०८२ ०५
महे शुल्काय वरुणस्य नु त्विष ओजो मिमाते ध्रुवम् अस्य यत् स्वम् ।
अजामिम् अन्यः सथयन्तम् आतिरद् दक्षेभिर् अन्यः प्र वृणोति भूयसः ॥ ७ ०८२ ०६
न तम् अंहो न दुरितानि मर्त्यम् इन्द्रावरुणा न तपः कुतश् चन ।
यस्य देवा गच्छथो वीथो अध्वरं न तम् मर्तस्य नशते परिह्वृतिः ॥ ७ ०८२ ०७
अर्वाङ् नरा दैव्येनावसा गतं शृणुतं हवं यदि मे जुजोषथः ।
युवोर् हि सख्यम् उत वा यद् आप्यम् मार्डीकम् इन्द्रावरुणा नि यच्छतम् ॥ ७ ०८२ ०८
अस्माकम् इन्द्रावरुणा भरे-भरे पुरोयोधा भवतं कृष्ट्योजसा ।
यद् वां हवन्त उभये अध स्पृधि नरस् तोकस्य तनयस्य सातिषु ॥ ७ ०८२ ०९
अस्मे इन्द्रो वरुणो मित्रो अर्यमा द्युम्नं यच्छन्तु महि शर्म सप्रथः ।
अवध्रं ज्योतिर् अदितेर् ऋतावृधो देवस्य श्लोकं सवितुर् मनामहे ॥ ७ ०८२ १०

(५९९)

युवां नरा पश्यमानास आप्यम् प्राचा गव्यन्तः पृथुपर्शवो ययुः ।
दासा च वृत्रा हतम् आर्याणि च सुदासम् इन्द्रावरुणावसावतम् ॥ ७ ०८३ ०१
यत्रा नरः समयन्ते कृतध्वजो यस्मिन्न् आजा भवति किं चन प्रियम् ।
यत्रा भयन्ते भुवना स्वर्दृशस् तत्रा न इन्द्रावरुणाधि वोचतम् ॥ ७ ०८३ ०२
सम् भूम्या अन्ता ध्वसिरा अदृक्षतेन्द्रावरुणा दिवि घोष आरुहत् ।
अस्थुर् जनानाम् उप माम् अरातयो ऽवाग् अवसा हवनश्रुता गतम् ॥ ७ ०८३ ०३
इन्द्रावरुणा वधनाभिर् अप्रति भेदं वन्वन्ता प्र सुदासम् आवतम् ।
ब्रह्माण्य् एषां शृणुतं हवीमनि सत्या तृत्सूनाम् अभवत् पुरोहितिः ॥ ७ ०८३ ०४
इन्द्रावरुणाव् अभ्य् आ तपन्ति माघान्य् अर्यो वनुषाम् अरातयः ।
युवं हि वस्व उभयस्य राजथो ऽध स्मा नो ऽवतम् पार्ये दिवि ॥ ७ ०८३ ०५
युवां हवन्त उभयास आजिष्व् इन्द्रं च वस्वो वरुणं च सातये ।
यत्र राजभिर् दशभिर् निबाधितम् प्र सुदासम् आवतं तृत्सुभिः सह ॥ ७ ०८३ ०६
दश राजानः समिता अयज्यवः सुदासम् इन्द्रावरुणा न युयुधुः ।
सत्या नृणाम् अह्रसदाम् उपस्तुतिर् देवा एषाम् अभवन् देवहूतिषु ॥ ७ ०८३ ०७
दाशराज्ञे परियत्ताय विश्वतः सुदास इन्द्रावरुणाव् अशिक्षतम् ।
श्वित्यञ्चो यत्र नमसा कपर्दिनो धिया धीवन्तो असपन्त तृत्सवः ॥ ७ ०८३ ०८
वृत्राण्य् अन्यः समिथेषु जिघ्नते व्रतान्य् अन्यो अभि रक्षते सदा ।
हवामहे वां वृषणा सुवृक्तिभिर् अस्मे इन्द्रावरुणा शर्म यच्छतम् ॥ ७ ०८३ ०९
अस्मे इन्द्रो वरुणो मित्रो अर्यमा द्युम्नं यच्छन्तु महि शर्म सप्रथः ।
अवध्रं ज्योतिर् अदितेर् ऋतावृधो देवस्य श्लोकं सवितुर् मनामहे ॥ ७ ०८३ १०

(६००)

आ वां राजानाव् अध्वरे ववृत्यां हव्येभिर् इन्द्रावरुणा नमोभिः ।
प्र वां घृताची बाह्वोर् दधाना परि त्मना विषुरूपा जिगाति ॥ ७ ०८४ ०१
युवो राष्ट्रम् बृहद् इन्वति द्यौर् यौ सेतृभिर् अरज्जुभिः सिनीथः ।
परि नो हेळो वरुणस्य वृज्या उरुं न इन्द्रः कृणवद् उलोकम् ॥ ७ ०८४ ०२

कृतं नो यज्ञं विदथेषु चारुं कृतम् ब्रह्माणि सूरिषु प्रशस्ता ।
उपो रयिर् देवजूतो न एतु प्र ण स्पार्हाभिर् ऊतिभिस् तिरेतम् ॥ ७ ०८४ ०३
अस्मे इन्द्रावरुणा विश्ववारं रयिं धत्तं वसुमन्तम् पुरुक्षुम् ।
प्र य आदित्यो अनृता मिनात्य् अमिता शूरो दयते वसूनि ॥ ७ ०८४ ०४
इयम् इन्द्रं वरुणम् अष्ट मे गीः प्रावत् तोके तनये तूतुजाना ।
सुरत्नासो देववीतिं गमेम यूयम् पात स्वस्तिभिः सदा नः ॥ ७ ०८४ ०५

(६०१)

पुनीषे वाम् अरक्षसम् मनीषां सोमम् इन्द्राय वरुणाय जुह्वत् ।
घृतप्रतीकाम् उषसं न देवीं ता नो यामन्न् उरुष्यताम् अभीके ॥ ७ ०८५ ०१
स्पर्धन्ते वा उ देवहूये अत्र येषु ध्वजेषु दिद्यवः पतन्ति ।
युवं ताꣳ इन्द्रावरुणाव् अमित्रान् हतम् पराचः शर्वा विषूचः ॥ ७ ०८५ ०२
आपश् चिद् धि स्वयशसः सदस्सु देवीर् इन्द्रं वरुणं देवता धुः ।
कृष्टीर् अन्यो धारयति प्रविक्ता वृत्राण्य् अन्यो अप्रतीनि हन्ति ॥ ७ ०८५ ०३
स सुक्रतुर् ऋतचिद् अस्तु होता य आदित्य शवसा वां नमस्वान् ।
आववर्तद् अवसे वां हविष्मान् असद् इत् स सुविताय प्रयस्वान् ॥ ७ ०८५ ०४
इयम् इन्द्रं वरुणम् अष्ट मे गीः प्रावत् तोके तनये तूतुजाना ।
सुरत्नासो देववीतिं गमेम यूयम् पात स्वस्तिभिः सदा नः ॥ ७ ०८५ ०५

(६०२)

धीरा त्व् अस्य महिना जनूंषि वि यस् तस्तम्भ रोदसी चिद् उर्वी ।
प्र नाकम् ऋष्वं नुनुदे बृहन्तं द्विता नक्षत्रम् पप्रथच् च भूम ॥ ७ ०८६ ०१
उत स्वया तन्वा ३ सं वदे तत् कदा न्व् अ १ न्तर् वरुणे भुवानि ।
किम् मे हव्यम् अहृणानो जुषेत कदा मृळीकं सुमना अभि ख्यम् ॥ ७ ०८६ ०२
पृच्छे तद् एनो वरुण दिदृक्षूपो एमि चिकितुषो विपृच्छम् ।
समानम् इन् मे कवयश् चिद् आहुर् अयं ह तुभ्यं वरुणो हृणीते ॥ ७ ०८६ ०३

किम् आग॑ आस वरुण ज्येष्ठं यत् स्तो॒तार॑ं जिघां॑ससि सखा॑यम् ।
प्र तन् मे॑ वोचो दूळभ स्वधावो ऽव॑ त्वा॒नेना नम॑सा तु॒र इ॑याम् ॥ ७ ०८६ ०४
अव॑ द्रु॒ग्धानि॒ पित्र्या॑ सृजा नो ऽव॑ या॒ वयं॑ च॒कृमा॒ तनू॑भिः॑ ।
अव॑ राजन् पशुतृ॒पं न ता॒युं सृ॒जा व॒त्सं न दाम्नो॒ वसि॑ष्ठम् ॥ ७ ०८६ ०५
न स स्वो दक्षो॑ वरुण ध्रु॒तिः सा सु॒रा॑ म॒न्युर् वि॒भीद॑को॒ अचि॑त्तिः ।
अस्ति॒ ज्याया॒न् कनी॑यस उपा॒रे स्वप्न॑श् च॒नेद् अनृ॑तस्य प्रयो॒ता ॥ ७ ०८६ ०६
अर॑ं दा॒सो न मी॑ळ्हुषे॑ कराण्य् अ॒हं दे॒वाय॒ भूर्ण॑ये ऽनागाः ।
अचे॑तयद् अ॒चितो॑ दे॒वो अ॒र्यो गृत्स॑ रा॒ये क॒वित॑रो जुनाति ॥ ७ ०८६ ०७
अ॒यं सु तुभ्यं॑ वरुण स्वधावो हृ॒दि स्तो॒म उप॑श्रितश् चिद् अस्तु ।
शं नः॒ क्षेमे॒ शम् उ॒ योगे॑ नो अस्तु यू॒यम् पा॑त स्व॒स्तिभि॒ः सदा॑ नः ॥ ७ ०८६ ०८

(६०३)

रद॑त् प॒थो वरु॑णः॒ सूर्या॑य॒ प्राणां॑सि समु॒द्रिया॑ नदीना॑म् ।
सर्गो॑ न सृ॒ष्टो अर्व॑तीर् ऋ॒तायञ् च॒कार॑ म॒हीर् अ॒वनी॒र् अह॑भ्यः ॥ ७ ०८७ ०१
आ॒त्मा ते॒ वातो॒ रज॒ आ न॑वी॒नोत् पशु॒र् न भूर्णि॒र् यव॑से ससवान् ।
अ॒न्तर् म॒ही बृ॒हती॒ रोद॑सी॒मे विश्वा॑ ते॒ धाम॑ वरुण प्रि॒याणि॑ ॥ ७ ०८७ ०२
परि॒ स्पशो॒ वरु॑णस्य॒ स्मदि॑ष्टा उ॒भे प॑श्यन्ति॒ रोद॑सी सु॒मेके॑ ।
ऋ॒तावा॑नः क॒वयो॑ य॒ज्ञधी॑राः प्रचे॑तसो य इ॒षय॑न्त॒ मन्म॑ ॥ ७ ०८७ ०३
उ॒वाच॑ मे॒ वरु॑णो मेधि॒राय॒ त्रिः स॒प्त नामाघ्न्या॑ बिभर्ति ।
वि॒द्वान् प॒दस्य॒ गुह्या॒ न वो॑चद् यु॒गाय॒ विप्र उप॑राय॒ शिक्ष॑न् ॥ ७ ०८७ ०४
ति॒स्रो द्यावो॒ निहि॑ता अ॒न्तर् अ॑स्मिन् ति॒स्रो भूमी॒र् उप॑राः॒ षड्वि॑धानाः ।
गृत्सो॒ राजा॒ वरु॑णश् च॒क्र ए॒तं दि॒वि प्रे॒ङ्खं हि॑र॒ण्यय॑ं शु॒भे कम् ॥ ७ ०८७ ०५
अव॒ सिन्धुं॑ वरु॒णो द्यौर् इ॑व॒ स्याद् द्र॒प्सो न श्वे॒तो मृ॒गस् तु॑वि॒ष्मान् ।
ग॒म्भी॒रशं॑सो॒ रज॑सो॒ वि॒मान॑ः सुपारक्ष॒त्रः स॒तो अ॒स्य राजा॑ ॥ ७ ०८७ ०६
यो मृ॒ळया॑ति॒ चक्रु॑षे॒ चिद् आगो॑ व॒यं स्या॑म॒ वरु॑णे अना॑गाः ।
अनु॑ व्र॒तान्य् अदि॑तेर् ऋधन्तो॑ यू॒यम् पा॑त स्व॒स्तिभि॒ः सदा॑ नः ॥ ७ ०८७ ०७

(६०४)

प्र शुन्ध्युवं वरुणाय प्रेष्ठाम् मतिं वसिष्ठ मीळ्हुषे भरस्व ।
य ईम् अर्वाञ्चं करते यजत्रं सहस्रामघं वृषणम् बृहन्तम् ॥ ७ ०८८ ०१
अधा न्व् अस्य संदृशं जगन्वान् अग्नेर् अनीकं वरुणस्य मंसि ।
स्व १ र् यद् अश्मन्न् अधिपा उ अन्धो ऽभि मा वपुर् दृशये निनीयात् ॥ ७ ०८८ ०२
आ यद् रुहाव वरुणश् च नावम् प्र यत् समुद्रम् ईरयाव मध्यम् ।
अधि यद् अपां स्नुभिश् चराव प्र प्रेङ्ख ईङ्खयावहै शुभे कम् ॥ ७ ०८८ ०३
वसिष्ठं ह वरुणो नाव्य् आधाद् ऋषिं चकार स्वपा महोभिः ।
स्तोतारं विप्रः सुदिनत्वे अह्नां यान् नु द्यावस् ततनन् याद् उषासः ॥ ७ ०८८ ०४
क्व १ त्यानि नौ सख्या बभूवुः सचावहे यद् अवृकम् पुरा चित् ।
बृहन्तम् मानं वरुण स्वधावः सहस्रद्वारं जगमा गृहं ते ॥ ७ ०८८ ०५
य आपिर् नित्यो वरुण प्रियः सन् त्वाम् आगांसि कृणवत् सखा ते ।
मा त एनस्वन्तो यक्षिन् भुजेम यन्धि ष्मा विप्र स्तुवते वरूथम् ॥ ७ ०८८ ०६
ध्रुवासु त्वासु क्षितिषु क्षियन्तो व्य् अ १ स्मत् पाशं वरुणो मुमोचत् ।
अवो वन्वाना अदितेर् उपस्थाद् यूयम् पात स्वस्तिभिः सदा नः ॥ ७ ०८८ ०७

(६०५)

मो षु वरुण मृन्मयं गृहं राजन्न् अहं गमम् ।
मृळा सुक्षत्र मृळय ॥ ७ ०८९ ०१
यद् एमि प्रस्फुरन्न् इव दृतिर् न ध्मातो अद्रिवः ।
मृळा सुक्षत्र मृळय ॥ ७ ०८९ ०२
क्रत्वः समह दीनता प्रतीपं जगमा शुचे ।
मृळा सुक्षत्र मृळय ॥ ७ ०८९ ०३
अपाम् मध्ये तस्थिवांसं तृष्णाविदज् जरितारम् ।
मृळा सुक्षत्र मृळय ॥ ७ ०८९ ०४
यत् किं चेदं वरुण दैव्ये जने ऽभिद्रोहम् मनुष्या ३ श् चरामसि ।

अचित्ती यत् तव धमा युयोपिम मा नस् तस्माद् एनसो देव रीरिषः ॥ ७ ०८९ ०५

(६०६)

प्र वीरया शुचयो दद्रिरे वाम् अध्वर्युभिर् मधुमन्तः सुतासः ।
वह वायो नियुतो याह्य अच्छा पिबा सुतस्यान्धसो मदाय ॥ ७ ०९० ०१
ईशानाय प्रहुतिं यस् त आनट् छुचिं सोमं शुचिपास् तुभ्यं वायो ।
कृणोषि तम् मर्त्येषु प्रशस्तं जातो-जातो जायते वाज्य् अस्य ॥ ७ ०९० ०२
राये नु यं जज्ञतू रोदसीमे राये देवी धिषणा धाति देवम् ।
अध वायुं नियुतः सश्चत स्वा उत श्वेतं वसुधितिं निरेके ॥ ७ ०९० ०३
उच्छन्न् उषसः सुदिना अरिप्रा उरु ज्योतिर् विविदुर् दीध्यानाः ।
गव्यं चिद् ऊर्वम् उशिजो वि वव्रुस् तेषाम् अनु प्रदिवः ससुर् आपः ॥ ७ ०९० ०४
ते सत्येन मनसा दीध्यानाः स्वेन युक्तासः क्रतुना वहन्ति ।
इन्द्रवायू वीरवाहं रथं वाम् ईशानयोर् अभि पृक्षः सचन्ते ॥ ७ ०९० ०५
ईशानासो ये दधते स्वर् णो गोभिर् अश्वेभिर् वसुभिर् हिरण्यैः ।
इन्द्रवायू सूरयो विश्वम् आयुर् अर्वद्भिर् वीरैः पृतनासु सह्युः ॥ ७ ०९० ०६
अर्वन्तो न श्रवसो भिक्षमाणा इन्द्रवायू सुष्टुतिभिर् वसिष्ठाः ।
वाजयन्तः स्व् अवसे हुवेम युयम् पात स्वस्तिभिः सदा नः ॥ ७ ०९० ०७

(६०७)

कुविद् अङ्ग नमसा ये वृधासः पुरा देवा अनवद्यास आसन् ।
ते वायवे मनवे बाधितायावासयन्न् उषसं सूर्येण ॥ ७ ०९१ ०१
उशन्ता दूता न दभाय गोपा मासश् च पाथः शरदश् च पूर्वीः ।
इन्द्रवायू सुष्टुतिर् वाम् इयाना मार्डीकम् ईट्टे सुवितं च नव्यम् ॥ ७ ०९१ ०२
पीवोअन्नाꣳ रयिवृधः सुमेधाः श्वेतः सिषक्ति नियुताम् अभिश्रीः ।
ते वायवे समनसो वि तस्थुर् विश्वेन् नरः स्वपत्यानि चक्रुः ॥ ७ ०९१ ०३
यावत् तरस् तन्वो ३ यावद् ओजो यावन् नरश् चक्षसा दीध्यानाः ।

शुचिं सोमं शुचिपा पातम् अस्मे इन्द्रवायू सदतम् बर्हिर् एदम् ॥ ७ ०९१ ०४
नियुवाना नियुत स्पार्हवीरा इन्द्रवायू सरथं यातम् अर्वाक् ।
इदं हि वाम् प्रभृतम् मध्वो अग्रम् अध प्रीणाना वि मुमुक्तम् अस्मे ॥ ७ ०९१ ०५
या वां शतं नियुतो याः सहस्रम् इन्द्रवायू विश्ववाराः सचन्ते ।
आभिर् यातं सुविदत्राभिर् अर्वाक् पातं नरा प्रतिभृतस्य मध्वः ॥ ७ ०९१ ०६
अर्वन्तो न श्रवसो भिक्षमाणा इन्द्रवायू सुष्टुतिभिर् वसिष्ठाः ।
वाजयन्तः स्व् अवसे हुवेम यूयम् पात स्वस्तिभिः सदा नः ॥ ७ ०९१ ०७

(६०८)

आ वायो भूष शुचिपा उप नः सहस्रं ते नियुतो विश्ववार ।
उपो ते अन्धो मद्यम् अयामि यस्य देव दधिषे पूर्वपेयम् ॥ ७ ०९२ ०१
प्र सोता जीरो अध्वरेष्व् अस्थात् सोमम् इन्द्राय वायवे पिबध्यै ।
प्र यद् वाम् मध्वो अग्रियम् भरन्त्य् अध्वर्यवो देवयन्तः शचीभिः ॥ ७ ०९२ ०२
प्र याभिर् यासि दाश्वांसम् अच्छा नियुद्भिर् वायव् इष्टये दुरोणे ।
नि नो रयिं सुभोजसं युवस्व नि वीरं गव्यम् अश्व्यं च राधः ॥ ७ ०९२ ०३
ये वायव इन्द्रमादनास आदेवासो नितोशनासो अर्यः ।
घ्नन्तो वृत्राणि सूरिभिः ष्याम सासह्वांसो युधा नृभिर् अमित्रान् ॥ ७ ०९२ ०४
आ नो नियुद्भिः शतिनीभिर् अध्वरं सहस्रिणीभिर् उप याहि यज्ञम् ।
वायो अस्मिन् सवने मादयस्व यूयम् पात स्वस्तिभिः सदा नः ॥ ७ ०९२ ०५

(६०९)

शुचिं नु स्तोमं नवजातम् अद्येन्द्राग्नी वृत्रहणा जुषेथाम् ।
उभा हि वां सुहवा जोहवीमि ता वाजं सद्य उशते धेष्ठा ॥ ७ ०९३ ०१
ता सानसी शवसाना हि भूतं साकंवृधा शवसा शूशुवांसा ।
क्षयन्तौ रायो यवसस्य भूरेः पृङ्क्तं वाजस्य स्थविरस्य घृष्वेः ॥ ७ ०९३ ०२
उपो ह यद् विदथं वाजिनो गुर् धीभिर् विप्राः प्रमतिम् इच्छमानाः ।
अर्वन्तो न काष्ठां नक्षमाणा इन्द्राग्नी जोहुवतो नरस् ते ॥ ७ ०९३ ०३

गीर्भिर् विप्रः प्रमतिम् इच्छमान ईट्टे रयिं यशसम् पूर्वभाजम् ।
इन्द्राग्नी वृत्रहणा सुवज्रा प्र नो नव्येभिस् तिरतं देष्णैः ॥ ७ ०९३ ०४
सं यन् मही मिथती स्पर्धमाने तनूरुचा शूरसाता यतैते ।
अदेवयुं विदथे देवयुभिः सत्रा हतं सोमसुता जनेन ॥ ७ ०९३ ०५
इमाम् उ षु सोमसुतिम् उप न एन्द्राग्नी सौमनसाय यातम् ।
नू चिद् धि परिमम्नाथे अस्मान् आ वां शश्वद्भिर् ववृतीय वाजैः ॥ ७ ०९३ ०६
सो अग्न एना नमसा समिद्धो ऽच्छा मित्रं वरुणम् इन्द्रं वोचेः ।
यत् सीम् आगश् चकृमा तत् सु मृळ तद् अर्यमादितिः शिश्रथन्तु ॥ ७ ०९३ ०७
एता अग्न आशुषाणास इष्टीर् युवोः सचाभ्य् अश्याम वाजान् ।
मेन्द्रो नो विष्णुर् मरुतः परि ख्यन् यूयम् पात स्वस्तिभिः सदा नः ॥ ७ ०९३ ०८

(६१०)

इयं वाम् अस्य मन्मन इन्द्राग्नी पूर्व्यस्तुतिः ।
अभ्राद् वृष्टिर् इवाजनि ॥ ७ ०९४ ०१
शृणुतं जरितुर् हवम् इन्द्राग्नी वनतं गिरः ।
ईशाना पिप्यतं धियः ॥ ७ ०९४ ०२
मा पापत्वाय नो नरेन्द्राग्नी माभिशस्तये ।
मा नो रीरधतं निदे ॥ ७ ०९४ ०३
इन्द्रे अग्ना नमो बृहत् सुवृक्तिम् एरयामहे ।
धिया धेना अवस्यवः ॥ ७ ०९४ ०४
ता हि शश्वन्त ईळत इत्था विप्रास ऊतये ।
सबाधो वाजसातये ॥ ७ ०९४ ०५
ता वां गीर्भिर् विपन्यवः प्रयस्वन्तो हवामहे ।
मेधसाता सनिष्यवः ॥ ७ ०९४ ०६
इन्द्राग्नी अवसा गतम् अस्मभ्यं चर्षणीसहा ।
मा नो दुःशंस ईशत ॥ ७ ०९४ ०७
मा कस्य नो अररुषो धूर्तिः प्रणङ् मर्त्यस्य ।

इन्द्राग्नी शर्म यच्छतम् ॥ ७ ०९४ ०८
गोमद् धिरण्यवद् वसु यद् वाम् अश्वावद् ईमहे ।
इन्द्राग्नी तद् वनेमहि ॥ ७ ०९४ ०९
यत् सोम आ सुते नर इन्द्राग्नी अजोहवुः ।
सनीवन्ता सपर्यवः ॥ ७ ०९४ १०
उक्थेभिर् वृत्रहन्तमा या मन्दाना चिद् आ गिरा ।
आङ्गूषैर् आविवासतः ॥ ७ ०९४ ११
ताव् इद् दुःशंसम् मर्त्यं दुर्विद्वांसं रक्षस्विनम् ।
आभोगं हन्मना हतम् उदधिं हन्मना हतम् ॥ ७ ०९४ १२

(६११)
प्र क्षोदसा धायसा सस्र एषा सरस्वती धरुणम् आयसी पूः ।
प्रबाबधाना रथ्येव याति विश्वा अपो महिना सिन्धुर् अन्याः ॥ ७ ०९५ ०१
एकाचेतत् सरस्वती नदीनां शुचिर् यती गिरिभ्य आ समुद्रात् ।
रायश् चेतन्ती भुवनस्य भूरेर् घृतम् पयो दुदुहे नाहुषाय ॥ ७ ०९५ ०२
स वावृधे नर्यो योषणासु वृषा शिशुर् वृषभो यज्ञियासु ।
स वाजिनम् मघवद्भ्यो दधाति वि सातये तन्वम् मामृजीत ॥ ७ ०९५ ०३
उत स्या नः सरस्वती जुषाणोप श्रवत् सुभगा यज्ञे अस्मिन् ।
मितज्ञुभिर् नमस्याइर् इयाना राया युजा चिद् उत्तरा सखिभ्यः ॥ ७ ०९५ ०४
इमा जुह्वाना युष्मद् आ नमोभिः प्रति स्तोमं सरस्वति जुषस्व ।
तव शर्मन् प्रियतमे दधाना उप स्थेयाम शरणं न वृक्षम् ॥ ७ ०९५ ०५
अयम् उ ते सरस्वति वसिष्ठो द्वारावृतस्य सुभगे व्य् आवः ।
वर्धा शुभ्रे स्तुवते रासि वाजान् यूयम् पात स्वस्तिभिः सदा नः ॥ ७ ०९५ ०६

(६१२)
बृहद् उ गायिषे वचो ऽसुर्या नदीनाम् ।

सरस्वतीम् इन् महया सुवृक्तिभि स्तोमैर् वसिष्ठ रोदसी ॥ ७ ०९६ ०१
उभे यत् ते महिना शुभ्रे अन्धसी अधिक्षियन्ति पूरवः ।
सा नो बोध्य् अवित्री मरुत्सखा चोद राधो मघोनाम् ॥ ७ ०९६ ०२
भद्रम् इद् भद्रा कृणवत् सरस्वत्य् अकवारी चेतति वाजिनीवती ।
गृणाना जमदग्निवत् स्तुवाना च वसिष्ठवत् ॥ ७ ०९६ ०३
जनीयन्तो न्व् अग्रवः पुत्रीयन्तः सुदानवः ।
सरस्वन्तं हवामहे ॥ ७ ०९६ ०४
ये ते सरस्व ऊर्मयो मधुमन्तो घृतश्चुतः ।
तेभिर् नो ऽविता भव ॥ ७ ०९६ ०५
पीपिवांसं सरस्वत स्तनं यो विश्वदर्शतः ।
भक्षीमहि प्रजाम् इषम् ॥ ७ ०९६ ०६

(६१३)

यज्ञे दिवो नृषदने पृथिव्या नरो यत्र देवयवो मदन्ति ।
इन्द्राय यत्र सवनानि सुन्वे गमन् मदाय प्रथमं वयश् च ॥ ७ ०९७ ०१
आ दैव्या वृणीमहे ऽवांसि बृहस्पतिर् नो मह आ सखायः ।
यथा भवेम मीळ्हुषे अनागा यो नो दाता परावतः पितेव ॥ ७ ०९७ ०२
तम् उ ज्येष्ठं नमसा हविर्भिः सुशेवम् ब्रह्मणस् पतिं गृणीषे ।
इन्द्रं श्लोको महि दैव्यः सिषक्तु यो ब्रह्मणो देवकृतस्य राजा ॥ ७ ०९७ ०३
स आ नो योनिं सदतु प्रेष्ठो बृहस्पतिर् विश्ववारो यो अस्ति ।
कामो रायः सुवीर्यस्य तं दात् पर्षन् नो अति सश्चतो अरिष्टान् ॥ ७ ०९७ ०४
तम् आ नो अर्कम् अमृताय जुष्टम् इमे धासुर् अमृतासः पुराजाः ।
शुचिक्रन्दं यजतम् पस्त्यानाम् बृहस्पतिम् अनर्वाणं हुवेम ॥ ७ ०९७ ०५
तं शग्मासो अरुषासो अश्वा बृहस्पतिं सहवाहो वहन्ति ।
सहश् चिद् यस्य नीलवत् सधस्थं नभो न रूपम् अरुषं वसानाः ॥ ७ ०९७ ०६
स हि शुचिः शतपत्रः स शुन्ध्युर् हिरण्यवाशीर् इषिरः स्वर्षाः ।
बृहस्पतिः स स्वावेश ऋष्वः पुरू सखिभ्य आसुतिं करिष्ठः ॥ ७ ०९७ ०७

देवी देवस्य रोदसी जनित्री बृहस्पतिं वावृधतुर् महित्वा ।
दक्षाय्याय दक्षता सखायः करद् ब्रह्मणे सुतरा सुगाधा ॥ ७ ०९७ ०८
इयं वाम् ब्रह्मणस् पते सुवृक्तिर् ब्रह्मेन्द्राय वज्रिणे अकारि ।
अविष्टं धियो जिगृतम् पुरंधीर् जजस्तम् अर्यो वनुषाम् अरातीः ॥ ७ ०९७ ०९
बृहस्पते युवम् इन्द्रश् च वस्वो दिव्यस्येशाथे उत पार्थिवस्य ।
धत्तं रयिं स्तुवते कीरये चिद् युयम् पात स्वस्तिभिः सदा नः ॥ ७ ०९७ १०

(६१४)

अध्वर्यवो ऽरुणं दुग्धम् अंशुं जुहोतन वृषभाय क्षितीनाम् ।
गौराद् वेदीयाꣳ अवपानम् इन्द्रो विश्वाहेद् याति सुतसोमम् इच्छन् ॥ ७ ०९८ ०१
यद् दधिषे प्रदिवि चार्व् अन्नं दिवे-दिवे पीतिम् इद् अस्य वक्षि ।
उत ह्रदोत मनसा जुषाण उशन्न् इन्द्र प्रस्थितान् पाहि सोमान् ॥ ७ ०९८ ०२
जज्ञानः सोमं सहसे पपाथ प्र ते माता महिमानम् उवाच ।
एन्द्र पप्राथोर्व् अ १ न्तरिक्षं युधा देवेभ्यो वरिवश् चकर्थ ॥ ७ ०९८ ०३
यद् योधया महतो मन्यमानान् साक्षाम तान् बाहुभिः शाशदानान् ।
यद् वा नृभिर् वृत इन्द्राभियुध्यास् तं त्वयाजिं सौश्रवसं जयेम ॥ ७ ०९८ ०४
प्रेन्द्रस्य वोचम् प्रथमा कृतानि प्र नूतना मघवा या चकार ।
यदेद् अदेवीर् असहिष्ट माया अथाभवत् केवलः सोमो अस्य ॥ ७ ०९८ ०५
तवेदं विश्वम् अभितः पशव्य १ं यत् पश्यसि चक्षसा सूर्यस्य ।
गवाम् असि गोपतिर् एक इन्द्र भक्षीमहि ते प्रयतस्य वस्वः ॥ ७ ०९८ ०६
बृहस्पते युवम् इन्द्रश् च वस्वो दिव्यस्येशाथे उत पार्थिवस्य ।
धत्तं रयिं स्तुवते कीरये चिद् युयम् पात स्वस्तिभिः सदा नः ॥ ७ ०९८ ०७

(६१५)

परो मात्रया तन्वा वृधान न ते महित्वम् अन्व् अश्नुवन्ति ।
उभे ते विद्म रजसी पृथिव्या विष्णो देव त्वम् परमस्य वित्से ॥ ७ ०९९ ०१

न ते॑ विष्णो॒ जाय॑मानो॒ न जा॒तो देव॑ महि॒म्नः पर॒म् अन्त॑म् आप ।
उद् अ॑स्तभ्ना॒ नाक॑म् ऋ॒ष्वम् बृ॒हन्तं॑ दा॒धर्थ॒ प्राचीं॑ क॒कुभ॑म् पृथि॒व्याः ॥ ७ ०९९ ०२
इरा॑वती धेनु॒मती॒ हि भू॒तं सू॑यव॒सिनी॒ मनु॑षे दश॒स्या ।
व्य् अस्तभ्ना॒ रोद॑सी विष्णव् ए॒ते दा॒धर्थ॑ पृथि॒वीम् अ॒भितो॑ म॒यूखैः॑ ॥ ७ ०९९ ०३
उ॒रुं य॒ज्ञाय॑ चक्रथुर् उलो॒कं ज॒नय॑न्ता॒ सूर्य॑म् उ॒षास॑म् अ॒ग्निम् ।
दास॑स्य चिद् वृषशि॒प्रस्य॑ मा॒या ज॒घ्नथु॑र् नरा पृत॒नाज्ये॑षु ॥ ७ ०९९ ०४
इन्द्रा॑विष्णू दृंहि॒ताः शम्ब॑रस्य॒ नव॒ पुरो॑ नव॒तिं च॑ श्नथिष्टम् ।
श॒तं व॒र्चिनः॑ स॒हस्रं॑ च सा॒कं ह॒थो अ॑प्र॒त्य् असु॑रस्य वी॒रान् ॥ ७ ०९९ ०५
इ॒यम् म॑नी॒षा बृ॑ह॒ती बृ॒हन्तो॑रुक्र॒मा त॒वसा॑ व॒र्धय॑न्ती ।
र॒रे वां॒ स्तोमं॑ वि॒दथे॑षु विष्णो॒ पिन्व॑त॒म् इषो॑ वृ॒जने॑ष्व् इन्द्र ॥ ७ ०९९ ०६
वष॑ट् ते विष्णव् आ॒स आ कृ॑णोमि॒ तन् मे॑ जुषस्व शिपिविष्ट ह॒व्यम् ।
वर्ध॑न्तु त्वा सुष्टु॒तयो॒ गिरो॑ मे यू॒यम् पा॑त स्व॒स्तिभिः॒ सदा॑ नः ॥ ७ ०९९ ०७

(६१६)

नू मर्तो॑ दयते सनि॒ष्यन् यो विष्ण॑व उरुगा॒याय॒ दाश॑त् ।
प्र यः स॒त्राचा॒ मन॑सा॒ यजा॑त ए॒ताव॑न्तं॒ नर्य॑म् आ॒विवा॑सात् ॥ ७ १०० ०१
त्वं वि॑ष्णो सुम॒तिं वि॒श्वज॑न्या॒म् अप्र॑युताम् एवयावो म॒तिं दाः॑ ।
पर्चो॒ यथा॑ नः सुवि॒तस्य॒ भूरे॒र् अश्वा॑वतः पुरुश्च॒न्द्रस्य॑ रा॒यः ॥ ७ १०० ०२
त्रिर् दे॒वः पृ॑थि॒वीम् ए॒ष ए॒तां वि च॑क्रमे श॒तर्च॑सम् महि॒त्वा ।
प्र विष्णु॑र् अस्तु त॒वस॒स् तवी॑यान् त्वे॒षं ह्य् अस्य॒ स्थवि॑रस्य॒ नाम॑ ॥ ७ १०० ०३
वि च॑क्रमे पृथि॒वीम् ए॒ष ए॒तां क्षेत्रा॑य॒ विष्णु॒र् मनु॑षे दश॒स्यन् ।
ध्रु॒वासो॑ अस्य की॒रयो॒ जना॑स उरुक्षि॒तिं सु॒जनि॑मा चकार ॥ ७ १०० ०४
प्र तत् ते॑ अ॒द्य शि॑पिविष्ट॒ नामा॒र्यः शं॑सामि व॒युना॑नि वि॒द्वान् ।
तं त्वा॑ गृणामि त॒वस॒म् अत॑व्या॒न् क्षय॑न्तम् अ॒स्य रज॑सः परा॒के ॥ ७ १०० ०५
किम् इत् ते॑ विष्णो परि॒चक्ष्य॑म् भू॒त् प्र यद् व॑व॒क्षे शि॑पिवि॒ष्टो अ॑स्मि ।
मा वर्पो॑ अ॒स्मद् अप॑ गूह ए॒तद् यद् अ॒न्यरू॑पः समि॒थे ब॒भूथ॑ ॥ ७ १०० ०६
वष॑ट् ते विष्णव् आ॒स आ कृ॑णोमि॒ तन् मे॑ जुषस्व शिपिविष्ट ह॒व्यम् ।

वर्धन्तु त्वा सुष्टुतयो गिरो मे यूयम् पात स्वस्तिभिः सदा नः ॥ ७ १०० ०७

(६१७)

तिस्रो वाचः प्र वद ज्योतिरग्रा या एतद् दुह्रे मधुदोघम् ऊधः ।
स वत्सं कृण्वन् गर्भम् ओषधीनां सद्यो जातो वृषभो रोरवीति ॥ ७ १०१ ०१
यो वर्धन ओषधीनां यो अपां यो विश्वस्य जगतो देव ईशे ।
स त्रिधातु शरणं शर्म यंसत् त्रिवर्तु ज्योतिः स्वभिष्ट्य् अ १ स्मे ॥ ७ १०१ ०२
स्तरीर् उ त्वद् भवति सूत उ त्वद् यथावशं तन्वं चक्र एषः ।
पितुः पयः प्रति गृभ्णाति माता तेन पिता वर्धते तेन पुत्रः ॥ ७ १०१ ०३
यस्मिन् विश्वानि भुवनानि तस्थुस् तिस्रो द्यावस् त्रेधा सस्रुर् आपः ।
त्रयः कोशास उपसेचनासो मध्व श्चोतन्त्य् अभितो विरप्शम् ॥ ७ १०१ ०४
इदं वचः पर्जन्याय स्वराजे हृदो अस्त्व् अन्तरं तज् जुजोषत् ।
मयोभुवो वृष्टयः सन्त्व् अस्मे सुपिप्पला ओषधीर् देवगोपाः ॥ ७ १०१ ०५
स रेतोधा वृषभः शश्वतीनां तस्मिन्न् आत्मा जगतस् तस्थुषश् च ।
तन् म ऋतम् पातु शतशारदाय यूयम् पात स्वस्तिभिः सदा नः ॥ ७ १०१ ०६

(६१८)

पर्जन्याय प्र गायत दिवस् पुत्राय मीळ्हुषे ।
स नो यवसम् इच्छतु ॥ ७ १०२ ०१
यो गर्भम् ओषधीनां गवां कृणोत्य् अर्वताम् ।
पर्जन्यः पुरुषीणाम् ॥ ७ १०२ ०२
तस्मा इद् आस्ये हविर् जुहोता मधुमत्तमम् ।
इळा नः संयत करत् ॥ ७ १०२ ०३

(६१९)

संवत्सरं शशयाना ब्राह्मणा व्रतचारिणः ।
वाचम् पर्जन्यजिन्विताम् प्र मण्डूका अवादिषुः ॥ ७ १०३ ०१
दिव्या आपो अभि यद् एनम् आयन् दृतिं न शुष्कं सरसी शयानम् ।
गवाम् अह न मायुर् वत्सिनीनाम् मण्डूकानां वग्नुर् अत्रा सम् एति ॥ ७ १०३ ०२
यद् ईम् एनाꣳ उशतो अभ्य् अवर्षीत् तूष्यावतः प्रावृष्य् आगतायाम् ।
अख्खलीकृत्या पितरं न पुत्रो अन्यो अन्यम् उप वदन्तम् एति ॥ ७ १०३ ०३
अन्यो अन्यम् अनु गृभ्णात्य् एनोर् अपाम् प्रसर्गे यद् अमन्दिषाताम् ।
मण्डूको यद् अभिवृष्टः कनिष्कन् पृश्निः सम्पृङ्क्ते हरितेन वाचम् ॥ ७ १०३ ०४
यद् एषाम् अन्यो अन्यस्य वाचं शाक्तस्येव वदति शिक्षमाणः ।
सर्वं तद् एषां समृधेव पर्व यत् सुवाचो वदथनाध्य् अप्सु ॥ ७ १०३ ०५
गोमायुर् एको अजमायुर् एकः पृश्निर् एको हरित एक एषाम् ।
समानं नाम बिभ्रतो विरूपाः पुरुत्रा वाचम् पिपिशुर् वदन्तः ॥ ७ १०३ ०६
ब्राह्मणासो अतिरात्रे न सोमे सरो न पूर्णम् अभितो वदन्तः ।
संवत्सरस्य तद् अहः परि ष्ठ यन् मण्डूकाः प्रावृषीणम् बभूव ॥ ७ १०३ ०७
ब्राह्मणासः सोमिनो वाचम् अक्रत ब्रह्म कृण्वन्तः परिवत्सरीणम् ।
अध्वर्यवो घर्मिणः सिष्विदाना आविर् भवन्ति गुह्या न के चित् ॥ ७ १०३ ०८
देवहितिं जुगुपुर् द्वादशस्य ऋतुं नरो न प्र मिनन्त्य् एते ।
संवत्सरे प्रावृष्य् आगतायां तप्ता घर्मा अश्नुवते विसर्गम् ॥ ७ १०३ ०९
गोमायुर् अदाद् अजमायुर् अदात् पृश्निर् अदाद् धरितो नो वसूनि ।
गवाम् मण्डूका ददतः शतानि सहस्रसावे प्र तिरन्त आयुः ॥ ७ १०३ १०

(६२०)

इन्द्रासोमा तपतं रक्ष उब्जतं न्य् अर्पयतं वृषणा तमोवधः ।
परा शृणीतम् अचितो न्य् ओषतं हतं नुदेथां नि शिशीतम् अत्रिणः ॥ ७ १०४ ०१
इन्द्रासोमा सम् अघशंसम् अभ्य् अ १ घं तपुर् ययस्तु चरुर् अग्निवाꣳ इव ।
ब्रह्मद्विषे क्रव्यादे घोरचक्षसे द्वेषो धत्तम् अनवायं किमीदिने ॥ ७ १०४ ०२
इन्द्रासोमा दुष्कृतो वव्रे अन्तर् अनारम्भणे तमसि प्र विध्यतम् ।

यथा नातः पुनर् एकश् चनोदयत् तद् वाम् अस्तु सहसे मन्युमच् छवः ॥ ७ १०४ ०३
इन्द्रासोमा वर्तयतं दिवो वधं सम् पृथिव्या अघशंसाय तर्हणम् ।
उत् तक्षतं स्वर्यं१ म् पर्वतेभ्यो येन रक्षो वावृधानं निजूर्वथः ॥ ७ १०४ ०४
इन्द्रासोमा वर्तयतं दिवस् पर्य् अग्निन्तप्तेभिर् युवम् अश्महन्मभिः ।
तपुर्वधेभिर् अजरेभिर् अत्रिणो नि पर्शानि विध्यतं यन्तु निस्वरम् ॥ ७ १०४ ०५
इन्द्रासोमा परि वाम् भूतु विश्वत इयम् मतिः कक्ष्याश्वेव वाजिना ।
यां वां होत्राम् परिहिनोमि मेधयेमा ब्रह्माणि नृपतीव जिन्वतम् ॥ ७ १०४ ०६
प्रति स्मरेथां तुजयद्भिर् एवैर् हतं द्रुहो रक्षसो भङ्गुरावतः ।
इन्द्रासोमा दुष्कृते मा सुगम् भूद् यो नः कदा चिद् अभिदासति द्रुहा ॥ ७ १०४ ०७
यो मा पाकेन मनसा चरन्तम् अभिचष्टे अनृतेभिर् वचोभिः ।
आप इव काशिना संगृभीता असन्न् अस्त्व् आसत इन्द्र वक्ता ॥ ७ १०४ ०८
ये पाकशंसं विहरन्त एवैर् ये वा भद्रं दूषयन्ति स्वधाभिः ।
अहये वा तान् प्रददातु सोम आ वा दधातु निर्ऋतेर् उपस्थे ॥ ७ १०४ ०९
यो नो रसं दिप्सति पित्वो अग्ने यो अश्वानां यो गवां यस् तनूनाम् ।
रिपु स्तेन स्तेयकृद् दभ्रम् एतु नि ष हीयतां तन्वा३ तना च ॥ ७ १०४ १०
परः सो अस्तु तन्वा३ तना च तिस्रः पृथिवीर् अधो अस्तु विश्वाः ।
प्रति शुष्यतु यशो अस्य देवा यो नो दिवा दिप्सति यश् च नक्तम् ॥ ७ १०४ ११
सुविज्ञानं चिकितुषे जनाय सच् चासच् च वचसी पस्पृधाते ।
तयोर् यत् सत्यं यतरद् ऋजीयस् तद् इत् सोमोऽवति हन्त्य् आसत् ॥ ७ १०४ १२
न वा उ सोमो वृजिनं हिनोति न क्षत्रियम् मिथुया धारयन्तम् ।
हन्ति रक्षो हन्त्य् आसद् वदन्तम् उभाव् इन्द्रस्य प्रसितौ शयाते ॥ ७ १०४ १३
यदि वाहम् अनृतदेव आस मोघं वा देवाँ अप्यूहे अग्ने ।
किम् अस्मभ्यं जातवेदो हृणीषे द्रोघवाचस् ते निर्ऋथं सचन्ताम् ॥ ७ १०४ १४
अद्या मुरीय यदि यातुधानो अस्मि यदि वायुस् ततप पूरुषस्य ।
अधा स वीरैर् दशभिर् वि यूया यो मा मोघं यातुधानेत्य् आह ॥ ७ १०४ १५
यो मायातुं यातुधानेत्य् आह यो वा रक्षाः शुचिर् अस्मीत्य् आह ।
इन्द्रस् तं हन्तु महता वधेन विश्वस्य जन्तोर् अधमस् पदीष्ट ॥ ७ १०४ १६
प्र या जिगाति खर्गलेव नक्तम् अप द्रुहा तन्व१ं गूहमाना ।

वव्राꣳ अनन्ताꣳ अव सा पदीष्ट ग्रावाणो घ्नन्तु रक्षस उपब्दैः ॥ ७ १०४ १७
वि तिष्ठध्वम् मरुतो विक्ष्व् ऐच्छत गृभायत रक्षसः सम् पिनष्टन ।
वयो ये भूत्वी पतयन्ति नक्तभिर् ये वा रिपो दधिरे देवे अध्वरे ॥ ७ १०४ १८
प्र वर्तय दिवो अश्मानम् इन्द्र सोमशितम् मघवन् सं शिशाधि ।
प्राक्ताद् अपाक्ताद् अधराद् उदक्ताद् अभि जहि रक्षसः पर्वतेन ॥ ७ १०४ १९
एत उ त्ये पतयन्ति श्वयातव इन्द्र दिप्सन्ति दिप्सवो ऽदाभ्यम् ।
शिशीति शक्रः पिशुनेभ्यो वधं नुनं सृजद् अशनिं यातुमङ्गयः ॥ ७ १०४ २०
इन्द्रो यातूनाम् अभवत् पराशरो हविर्मथीनाम् अभ्य् आ ३ विवासताम् ।
अभीद् उ शक्रः परशुर् यथा वनम् पात्रेव भिन्दन् सत एति रक्षसः ॥ ७ १०४ २१
उलूकयातुं शुशुलूकयातुं जहि श्वयातुम् उत कोकयातुम् ।
सुपर्णयातुम् उत गृध्रयातुं दृषदेव प्र मृण रक्ष इन्द्र ॥ ७ १०४ २२
मा नो रक्षो अभि नड् यातुमावताम् अपोच्छतु मिथुना या किमीदिना ।
पृथिवी नः पार्थिवात् पात्व् अंहसो ऽन्तरिक्षं दिव्यात् पात्व् अस्मान् ॥ ७ १०४ २३
इन्द्र जहि पुमांसं यातुधानम् उत स्त्रियम् मायया शाशदानाम् ।
विग्रीवासो मूरदेवा ऋदन्तु मा ते दृशन् सूर्यम् उच्चरन्तम् ॥ ७ १०४ २४
प्रति चक्ष्व वि चक्ष्वेन्द्रश् च सोम जागृतम् ।
रक्षोभ्यो वधम् अस्यतम् अशनिं यातुमङ्गयः ॥ ७ १०४ २५